और्ध्वदैहिकपद्धतिः

४५७५

सं. ४

पुस्तकमिदं वैद्यगापाठकस्य

उ०प०

॥श्रीगणेशाय नमः॥ ॥श्रीगुरुभ्यो नमः॥ ॥भट्टरामेश्वरसुतो भट्टनारायणः सुधीः नत्वा शिवो
संविचार्य तनुतेन्त्येष्टपद्धतीं आसन्नमरणे पित्रादिकं पुत्रादिस्तदर्थे नीत्वा प्रायश्चित्तं कारयेत्॥
१ तदीयं स्वयं वा कुर्यात्॥ तत्र षडब्दं अर्द्धं सार्द्धाब्दं वा यथाशक्ति त्वं देवसुवर्णप्रत्याम्नायद्वारा कु
र्यात् संकल्पमात्रं वा कृत्वा स्नातकां तेन कुर्यात् तद्यथा चतुस्त्रीनेकं वाध्यात्मविंदपर्षत्सन्नो
पवेशे कृतस्नानः शक्तो मस्तां क्लिन्नवासाः अभुंजानः पर्षदं प्रदक्षिणीकृत्य हृदये हूयमानो ध
रण्यां सांष्टांगं प्रणमयेत्॥ ततः स्तेः किं ते कार्यं मिथ्या मा वादीः सत्यमेवं वदेत्यादिष्टः पर्षद ला
ग्रे गोवृषयोः प्रत्येकप्रत्याम्नायेन यथाशक्ति स्वर्णरौप्ययोर्निष्कं तदर्द्धं तदर्द्धं वा निधायामुकस्य
जन्मप्रभृति अद्य यावत् ज्ञानाज्ञानकामाकाम सकृदसकृत् कृत कायिकवाचिकमानसिक १
सांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातकोपपातकलघुपातक

संकलीकरणप्रकीर्णपातकानांमध्येसंभावितपातकनिरासार्थंममानुग्रहंकृत्वाप्रायश्चित्तमुपदिशं
तुभवंतः तथाच सर्वेधर्मविवेक्तारोगोप्तारः सकलाद्विजाः ममदेहस्यसंशुद्धिंकुर्वंतुद्विजसत्तमाः
मयाकृतंमहाघोरंज्ञानमज्ञानकिल्बिषं प्रसादःक्रियतामस्मिन्शुभानुज्ञांप्रयच्छथ पूज्यैःकृतःप
वित्रोहंभवेयंद्विजसत्तमैः एवंप्रार्थयेत् पुत्रादिश्चेत्प्रायश्चित्तंकरोति तदास्मेच्छंदस्थानितन्नाम
निर्दिशेत् प्रार्थनानंतरंमामनुगृह्णंतुभवंत इतिप्रणमेत् ततस्तेमुत्सार्यतस्यशरीरद्रव्यादिश
क्तिउत्तममध्यमादिपक्षांश्चविचार्यअस्मिन्पक्षेयंशक्तः इतिनिश्चित्यपुस्तकवाचमनुपूर्वकंक
थयेयुरनुवादकस्याग्रेप्रत्याम्नायाश्चशक्त्याकल्पयेयुः अस्मिन्कालेप्रायश्चित्ती चंदनपुष्पादि
भिःपुस्तकपूजामभ्यनुवादकपूजांचविधायबंधप्रजात्वेन किंचिद्यथाशक्तिद्रव्यंनिधायकृतां
पुटोनमस्तिष्ठेत् अनुवादयुपापानुसारेणदक्षिणांदद्यात् ततोनुवादकः पूर्वोक्तविशेषणवि

शिष्टायां पूर्वोक्तानां महापातकव्यतिरिक्तानां पातकानां क्षयो नेन पर्षदुपदिष्टेन सर्वप्रायश्चित्तेना
मुकप्रत्याम्नायद्वारा प्राच्यादीच्यां गसहितेनाचरणेन तच्च भविष्यति तेन त्वं कृतार्थो भविष्यसि इ
त्युपदेशः इति त्रिः ३ तच्च सर्वप्रायश्चित्तं शक्त्यानुसारेण षडब्द त्र्यब्द सार्द्धाब्दं अन्यद्वा पर्षदानुमे
तं प्रत्याम्नायश्च गोपव्ययुतजपतिलक्षहोमं सहस्रद्वादशब्राह्मणभोजनतीर्थयोजनयात्रायां
एकगोदाने सुवर्णरूप्यनिष्कतदर्धतदर्धानां मूल्यानां भक्त्यादानेश्वशक्तकेशस्य द्वादशस्नाने शुद्धि
गुणदशमात्रदानैश्चैकः प्राजापत्य इति ततः शक्त्यास्याम्नाने द्विगुणद्रव्यं चतुर्गुणमित्यादि
याज्ञ्यं विज्ञश्च लोकशास्त्रयोरेकवाक्यतायां माषः ४० तदर्धं २० तदर्धं तु १० मुख्यसुवर्णं तदश
क्तौ रजतं ग्राह्यं ततो निर्दिष्टं प्रायश्चित्तं भवदनुग्रहादित्यंगीकृत्य समानपूर्वं प्रणम्य पर्षदं विस
र्जयेत् अस्मिन्नहनि शनोपवासः कार्यः इतरेण हविष्याशनं ततः कश्यांश्चिद्विक्तायां तिथौच

तमाध्यान्हिकः सायान्हेगंगाद्वौदेशकालौ संकीर्त्य कमुकशर्मणो मम जन्मप्रभृति अद्य यावत् ज्ञानाज्ञानकामाकामसकृदसकृत् कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकअतिपातकउपपातकोपपातकानां लघुपातकसंकलीकरणमलनीकरणअपात्रीकरणजातिभ्रंशकरप्रकीर्णपातकानां मध्ये संभावितपातकानां निरासेन प्रकरणकालेशुध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं चामुकप्रायश्चित्ताङ्गमुकप्रत्याम्नायेन प्राच्योदीच्याङ्गसहितेन यथाशक्ति करिष्ये इति संकल्प्य यानिकानिच पापानि ब्रह्महत्यासमानि च केशानाश्रित्य तिष्ठन्ति तस्मात्केशान्वपाम्यहं॥ इति मंत्रेण शिखाकक्षोपस्थवर्जं नखलोमानि वापयित्वा ततः प्राङ्मुखद्वादशांगुलदंतकाष्टं गृहीत्वा॥ तत्र मंत्रः॥ आयुर्बलंयशोवर्चः प्रजांपशुवसूनि च॥ श्रियंप्रज्ञां च मेधां च त्वन्नो धेहि वनस्पते इति मंत्रेण दंतान् शोध्य द्वादशगंडूषं त्यक्त्वा भस्मादिस्नानं कुर्यात् तत्र भस्मस्नानमेवं ॐ ईशानः सर्ववि

द्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेऽअस्तुसदाशिवों इतिशिरसि ॐत
त्पुरुषायविद्महेमहादेवायधीमहि तन्नोरुद्रःप्रचोदयात् इतिमुखे ॐअघोरेभ्योथघोरेऽभ्योघोरघो
रतरेभ्यःसर्वेभ्यःसर्वसर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः इतिहृदये वामदेवायनमोज्येष्ठायनमःश्रेष्ठा
यनमोरुद्रायनमःकालायनमःकलिविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथ
नायनमःसर्वभूतदमनायनमोनमोन्मनायनमः इतिगुह्ये सद्योजातंप्रपद्यामिसद्योजातायवै
नमोनमः भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः इतिपादयोः ॐप्रणवेनसर्वांगे यद्वा अग्नि
रितिभस्म वायुरितिभस्म जलमितिभस्म स्थलमितिभस्म व्योमेतिभस्म सर्वंहवाइदंभस्म इति
मंत्रैः भस्मंस्नात्वा गोमयेनस्नापयेत् ॐगंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानां
तामिहोपह्वयेश्रियं ॐअग्रमग्र्यश्वरंतरुनांमोषधीनांवनेवने तासामृषभपत्नीनांपवित्रंकायशोधनं यन्मे

रोगांश्चाशोकांश्चनुदगोमयसर्वदा इतिगोमयस्नानं अथमृत्तिकास्नानं ॐ बलित्थापर्वतानांखि
द्रंबिभर्षिऽपृथिवि प्रयाभूमिंप्रवत्वतिमन्हाजिनोषिमहिनि इतिभूमिंप्रार्थ्य मावोरिषत्खनिता
५ यस्मैचाहंखनामिवः द्विच्चतुष्पदस्माकंसर्वमस्त्वनातुरे इतिखनित्वा स्योनापृथिवीभवान्
वृक्ष[illegible]रानिवेशनी यच्छानःशर्मसप्रथः इतिमृदमादाय ॐ आयेनेतेपरायणेदूर्वारोहंतु
पुष्पिणी दूर्वामभ्युक्ष्य भूमौनिधाय अद्येत्यादिपूर्वप्रायश्चित्तांगभूतं मृत्तिकास्नानमहंकरि
ष्ये ततःमृदंदिक्षुदिशंक्षिप्त्वा तत्तन्मंत्रः ॐ त्रातारमिंद्रमवितारमिंद्रं हवेहवेसुहवंशूरमिंद्रं हु
यामिशक्रंपुरुहूतमिंद्रस्वस्तिनोमघवाधात्विंद्रः इतिपूर्वे ॐ यमायसोमंसुनुतयमायजुहु
ताहविः यमंहयज्ञोगछत्यग्निदूतोअरंकृतः दक्षिणे ॐ तत्वायामिब्रह्मणावंदमानस्तदाशा
स्तेयजमानोहविर्भिः अहेलमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः इतिपश्चिमे ॐ वय

उप० सोमव्रतेतवमनस्तनूषुविभ्रतः प्रजावंतः सचेमहि उत्तरतः सूर्यो नोदिवस्पातु वातोअंतरिक्षात् अ
ग्निर्नः पार्थिवेभ्यः उपरिष्टात् अधः पश्यस्वमोपरिसंतरां पादकौहर मातेकशप्लकौदृशन् स्त्रीहि
ब्रह्माबभूविथ इत्यधः नतोंगेषुमृदंलिंपेत् सहस्रशीर्षेतिशिरसि अक्षिभ्यांतेनासिकाभ्यां कर्णाभ्यां
छुबुकादधि यक्ष्मंशीर्षण्यमस्तिष्काज्जिह्वायाविवृहामिते इतिमुखे ग्रीवाभ्यस्तउष्णिहाभ्यः कीक
५ साभ्योअनूक्यात् यक्ष्मंदोषण्य१मंसाभ्यां बाहुभ्यांविवृहामिते इतिग्रीवायां आंत्रेभ्यस्तेगुदाभ्यो
वनिष्ठोहृदयादधि यक्ष्मंमतस्नाभ्यां यक्नः प्लाशिभ्योविवृहामिते इतिहृदये नाभानाभिंनआददे
चक्षुश्चित्सूर्येसचा कुवेरपत्यमादुहे इतिनाभौ त्वमिंद्रसजोषसमर्कंबिभर्षिबाह्वोः वज्रंशिशा
नओजसा इतिबाह्वोः सोमानंस्वरणं कृणुहिब्रह्मणस्पते कक्षिवंतंयऔशिजः इतिकक्ष्योः
बह्वीनांपिता बहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य इषुधिः संकाः पृतनाश्चसर्वाः पृष्ठेनि
× यः कुक्षिः सोमपातमः समुद्रइवपिन्वते उर्वीरापोनकाकुदः इतिकुक्ष्योः २

नध्योजयतिप्रसृतः इतिपृष्ठे उरुभ्यांते अष्ठीवद्भ्यांपाष्णिभ्यां प्रपदाभ्यां यक्ष्मं श्रोणिभ्यां भासदाद्भंससो
विवृहामिते इत्यूर्वोः मेहनाद्वनंकरणाल्लोमभ्यस्तेनखेभ्यः यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते।
इतिजान्वोः एतावानस्यमहिमातोज्यायांश्चपूरुषः पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि पाद
योः यस्यविश्वानिहस्तयोः पंचक्षितीनांवसु स्याशायस्वयोअस्मध्रुक्दिव्येवाशानिर्जहि हस्तयोः अंगाद
गाल्लोम्नोल्लोम्नोजातंपर्वणिपर्वणि यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते इतिमंत्रेणपुरुषसूक्ते
न सर्वांगोद्वर्तनं ततः अश्वक्रांत इत्यादिभिः सतिलांसदूर्वांमृदंशिरसिनिधाय मृत्तिकास्नानंप्रक्षा
ल्यतीर्थंप्रार्थयेत् हिरण्यशृंगेति॰ यन्मेमनसावाचा॰ इमंमेगंगेतिऋक्॰ गंगागंगेतियोब्रूयात्॰
सुमित्र्यानआप॰ समुद्रज्येष्ठा इतिचतसृभिः एतोन्विंद्रंस्तवामितितिसृभिः॰ तरत्समंदीतिसूक्तं॰
पावमानीसूक्तं॰ आपोहिष्ठेतितृचेनमार्जनंकृत्वा इमंमेगंगेतिउदकमालोड्य ऋतंचसत्यंतित्र

५

उप० ऋचजपंनयकमेणंकृत्वा ततः प्रवाहाभिमुखंवत्रिवारंजपेत् इतिमृत्तिकास्नानं ततः आपोहिष्ठेतित्
चेनशुद्धोदकस्नानंकुर्यात् अथपंचगव्यस्नानं गायत्र्यागोमूत्रं • गंधद्वारामितिगोमयं आप्याय
स्वेतिक्षीरं दधिक्राव्णइतिदधि घृतंमिमिक्षेतिघृतं देवस्यत्वेतिकुशोदकस्नानंकुर्यात् स्त्रीशूद्रा
5 णाममंत्रकस्नानंकुर्यात् शुद्धस्नानांतेधौतवासः परिधायतिलकंकुर्यात् स्नानांमतर्पणांतेवस्त्रं
गृहीत्वा द्विराचम्यसंध्यावंदनादिसंपाद्य ततः विष्णुदेशेनत्रिभ्योधिकान्युग्मब्राह्मणान्पूजा
पूर्वकंभोजयेत् आमान्नंवादद्यात् इयमेवप्रायश्चित्तांगविष्णुश्राद्धमित्यभिधीयते ततोगोदानं॥
गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश॥ यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच इतिगोदानंप्रत्य
क्षंनिष्क्रायद्वाराकुर्यात् ततोअग्निस्थापनादिपूर्वकमाज्येनव्याहृतिभिः पापहाविष्णुदेशेनाष्टो
त्तरशतंअष्टाविंशतिंजुहुयात् ततः पंचगव्यंकार्यं सुवर्णादिपात्रेपत्रादिपात्रेवाताम्रायात्रि
पत्रं गायत्र्याप्रणवेनवाआदाय ततोंगुष्ठार्धपरिमितंश्वेतायाः गोमयं गंधद्वारेत्यादयः ततः कपि

त्नायाः घृतमेकपलं घृतं मिमिक्षमिति घृतं ततः तिलायाः सप्तपलं दधिक्रा एव इत्यादाय ततः एकं पलं कु
शोदकमापोहिष्ठेत्यादय प्रणवेनेव यज्ञियकाष्ठेन निर्मथ्य प्रणवेनाभिमंत्र्य समपत्रैर्हरतेः कुशे दशाहु
तं जुहुयात् एभिर्मंत्रैः ॐ इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या व्यस्तभ्नाद्रोदसी वि
ष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा पृथिव्य इदं न मम ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं।
समूढमस्य पांसुरे स्वाहा विष्णव इदं न मम ॐ मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वे
षु रीरिषः वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतः सदमित्वा हवामहे स्वाहा रुद्राय इदं न मम।।
ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः सबुध्निया उपमा अस्य विष्ठाः सतश्च यो
निमसतश्च विवः स्वाहा ब्रह्मण इदं न मम ॐ अग्नये स्वाहा॰ अग्नय इदं न॰ ॐ सोमाय स्वाहा सोमा
य इदं न॰ ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् स्वाहा सूर्याय इदं॰ ॐ
स्वाहा प्रजापतय इदं॰ ॐ भूर्भुवः स्वः स्वाहा प्रजापतय इदं॰ ॐ अग्नये स्विष्टकृते स्वाहा अग्नये स्वि

६

उप० कृतयद्दं ०अद्येत्यादि सर्वप्रायश्चित्तांगभूतं व्रतग्रहणं करिष्ये इति द्विजान् पृच्छेत् ते: करिष्येत्यनुज्ञातः।।
प्रणवेति सर्वं पिबेत् एतच्च ग्रामाद्बहिः नद्यादितीरे नक्षत्रदर्शने कार्यं अशक्तौ गोमूत्रादि स्वल्पं ग्राह्यं
सर्वस्य पेयपत्वात् अस्मिं दिने उपवासः शक्तस्य अन्यस्य हविष्याशनं इति पंचगव्यं प्राश्य गृहे आ
6 गत्य विष्णुस्मरन्मौनी निशामनिवाह्य प्रक्रांतं प्रायश्चित्तं संकल्प्यानुसारेण प्रत्याम्नायद्वारा द्वारा कुर्या
त् उत्तरांगानि कुर्यात् व्याहृतिभिराज्यं पूर्ववत् हुत्वा पूर्ववत् पुनः प्रायश्चित्तांगविष्णुश्राद्धं कृत्वा।।
ते गोदानं पूर्ववत् चरेत् एवं प्रायश्चित्तं कृत्वा शक्तौ सत्यां दशदानान्यपि कुर्यात् तानि च गोभूतिल
हिरण्याज्यं वासो धान्यं गुडानि च रौप्यं लवणमित्यादौ दशदाना प्रकीर्तिताः एवं प्रत्यक्षं कुर्यात्।।
यद्वा निष्क्रयद्रव्यं ततः गोदानं गवामंगेषु तिष्ठंति भुवनानि चतुर्दश यस्मात्तस्माच्छिवं मे स्यादिह
लोके परत्र च आवो मे अग्रतः संतु गावो मे संतु पृष्ठतः गावो मे हृदयः संतु गवां मध्ये वसाम्यहं अ
नेन गोदानेन यस्मै कस्मै ब्राह्मणाय संप्रददे प्रत्यक्षं देयं तत्प्रत्याम्नायद्रव्यद्वारा कुर्यात् इत्यनेन गा

दानं अथभूमिदानं सर्वभूताश्रयाभिर्वराहेणसमुधृता अनंतसस्यफलदामतः शांतिंप्रयछमे २

अथतिलदानं महर्षेर्गोत्रसंभूताः काश्यपस्यतिलास्मृताः तस्मात्तेषांप्रदानेनममपापंव्यपोहतुं॥३

अथहिरण्यदानं हिरण्यगर्भगर्भस्थंहेमबीजंबिभावसो अनंतपुण्यफलदमतः शांतिप्रयछमे॥४॥

अथआज्यदानं कामधेनुषुसंभूतंसर्वक्रतुषुसंस्थितं देवानामाज्यमाहारमतः शांतिंप्रयछमे॥ ५॥

अथवस्त्रदानं शरणंसर्वलोकानांलज्जायारक्षणंपरं सुवेशधारणंवस्त्रमतः शांतिप्रयछमे॥ ६॥

अथधान्यदानं सर्वमेवमयंधान्यंसर्वोत्पत्तिकरंमहत् प्राणिनांजीवनोपायमतः शांतिप्रयछमे॥ ७॥

अथगुडदानं तथारसानांप्रवरः सदेवेक्षुरसोमतः ममतस्यात्परांलक्ष्मींददस्वगुडसर्वदा॥ ८॥

अथरौप्यदानं प्रीतिर्यतः पितृणांचविष्णुशंकरयोः सदा शिवनेत्रोद्भवंरौप्यमतः शांतिप्रयछमे॥९॥

अथलवणदानं यस्मादन्नरसाः सर्वेनोत्कृष्टालवणंविना शंभोः प्रीतिकरंनित्यमतः शांतिप्रयछ

मे १० एवंदशदानानिकृत्वा मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर यत्पूजितंमयादेवःपरिपूर्णंतद
स्तुमे इतिवदन्विष्णुंस्मरेत् एतानिदशदानानिसभ्यएव तदसंभवेअन्येभ्योपि ततः यन्मयाकृत
मशुकप्रायश्चित्तंतदछिद्रमस्तु इतिकर्त्तावदेत् व्रतछिद्रंतपछिद्रंयछिद्रंयज्ञकर्मणि सर्वंभवतुमे
छिद्रंब्राह्मणानांप्रसादतः अछिद्रमस्त्वितिब्राह्मणाःप्रतिवचनंब्रूयुः एतत्प्रायश्चित्तमकृत्वैवयदि
पितादिमृतः तस्यानुकल्पानिश्चयेपुत्रादिनाइदमवश्यंकार्यंपुत्रादिनाकरणेपंचगव्यप्राशनाभावः
यस्यस्मृत्येतिसर्वप्रायश्चित्तांगभूतंयथाशक्त्यायथालिब्राह्मणंभोजनइष्टं नानानांगोत्रेभ्यो
ब्राह्मणेभ्योभूयसींदक्षिणांदद्यात् ततःऔर्ध्वदेहिकं॥ ॥छ॥ ॥छ॥ रामायनमः॥ ॥छ॥॥
ततःमरणानंतरंपुत्रादिसचैलस्नानंकुर्यात् आर्द्रवस्त्रैःक्षौरंकुर्यात् स्नात्वाचमद्यदेशकालौस्मृ
त्वाद्यत्यादितिथौममपित्राःदेःक्रियाधिकारार्थंक्षौरंकरिष्ये इतिसंकल्प्य यानिकानिचपापा

निब्रह्महत्यासमानिच केशानाश्रित्यतिष्ठंतितस्मात्केशान्वपाम्यहं महापापोपपापानां केशश्मश्रुनखा
त्वचः क्षुरादिसर्वगात्राणितेमेदोषाः पतंत्वधः इतिप्रार्थ्य दक्षिणश्मश्रुनिनखलोमानिवापयेयुः॥
कक्षोपस्थवर्जं पुनःस्नात्वाचम्य पवित्रेधृत्वा अथदेशकालौस्मृत्वा ममपित्रादेः और्ध्वदेहिकाधिका
रार्थंकृच्छ्रत्रयप्रायश्चित्तंसतत्कांतेगोनिष्क्रयद्रव्यद्वाराअहमाचरिष्ये ततः अद्येत्यादिपित्रादेःऔ
र्ध्वदेहिकाधिकारार्थंआत्मनःशुद्ध्यर्थंकृच्छ्रत्रयप्रायश्चित्तंसतत्कांतेगोनिष्क्रयद्रव्यद्वाराअहमाच
रिष्ये ततः अद्येत्यादिममपित्रादेः ऊर्ध्वोच्छिष्टाधरोच्छिष्टउभयोच्छिष्टस्पृश्यास्पृष्टमरणखट्वमर
णवंधनमरणादिषुसत्सुषड्द्वादशपंचदशवाकृच्छ्रान्प्रायश्चित्तानिवित्तानुसारेणब्राह्मणवच
नान्नरहीत्वाशक्तोसत्यांतदेवेतत्प्रत्याम्नायतयाहिरण्यादिसतत्कांतेअहमाचरिष्ये शुद्धंसंपाद्य
अद्येत्यादिकालंस्मृत्वा अमुकगोत्रस्यअमुकशर्मणोप्रेतस्यसुखेनप्राणोत्क्रमणप्रतिबंधोत्कनिष्क

उप०

८

त्यनुत्क्रनिष्कृति सकलपातकक्षयद्वारा सुखेन प्राणोत्क्रमणार्थं यथाशक्त्या अलंकृतां इमां उत्क्रान्तधेनुं
रुद्रदैवत्याममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे गवामंगेषु तिष्ठन्ति भुवनानि चतु
र्दश यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र च इति मंत्रमुक्त्वा सतक्रांते यस्मै कस्मै ब्राह्मणाय संप्रददे ॥
ततः वैतरणीदानं अद्येत्यादि कालं स्मृत्वा मम पित्रादेः यमद्वारास्थितवैतरणी नद्युत्तारणार्थं गो
दानं करिष्ये इति संकल्प्य विष्णुरूप द्विजश्रेष्ठ भूदेव द्विजपावन तर्तुं वैतरणीमेमां कृष्णां गां प्रददाम्य
हं इति प्रार्थ्य धेनुके त्वं प्रतीक्षस्व यमद्वारे महापथे उत्तितीर्षुर्हरं देवी वैतरणी नमोस्तु ते ॥ वैतरणी संत
रणार्थे इमां गां कृष्ण वस्त्रमाल्याद्यलंकृतां यथाशक्ति दक्षिणां सतक्रांते यस्मै कस्मै ब्राह्मणाय संप्रददे
निष्क्रयद्रव्य द्वारा अहमाचरिष्ये पुनः प्रार्थ्य यमद्वारे पथे घोरे घोरा वैतरणी नदी तां ततुं कामो यच्छा
मि कृष्णा वैतरणीं तु गां अद्येत्यादि कालं स्मृत्वा मम पित्रादेः अमुकशर्मणः प्रेतस्य जन्मप्रभृति मर
णांतं नानाविधपापनाशनार्थं सदक्षिणं तिलपात्रदानं करिष्ये तिलाः पुण्याः पवित्राश्च तिलाः स

वैकरास्मृताः शुक्लावायुदिवाकृष्णाऋषिगोत्रसमुद्भवाः यानिकानिचपापानिब्रह्महत्यासमानिच तिल
पात्रप्रदानेनतानिनश्यंतुसर्वदा महर्षिगोत्रसंभूताः काश्यपस्यतिलास्मृताः तस्मात्तेषांप्रदानेनमम
मपापंव्यपोहतु अनेनतिलपात्रदानेनस्वतक्रांतेअहमाचरिष्ये ततः अद्येत्यादिकालंस्मृत्वाअमृत
त्वप्राप्तिकामनयाभिध्यर्थंपुण्यसूक्तादिपाठमहंकरिष्ये नानानंवामितिसूक्तस्यशिशुरांगिरऋ
षिः पवमानसोमोदेवतापंक्तिछंदः अमृतत्वप्राप्तये जपेविनि० ॐ नानानंवाउनोधियोविव्रतानि
जनानां तक्षारिष्टंरुतंभिषग्ब्रह्मासुन्वंतमिच्छतींद्रायेंदोपरिस्रव जरतीभिरोषधीभिः पर्णेभिः
शकुनानां कार्मारोअश्मभिर्द्युभिर्हिरण्यवंतमिच्छतींद्रायेंदोपरिस्रव कारुरहंततोभिषगुपल
प्रक्षिणीनना नानाधियोवसूयवोनुगाइवतस्थिमेंद्रायें० अश्वोवोळ्हासुखंरथंहसनामुपमंत्रि
णः शेपोरोमण्वंतौभेदौवारिन्मंडूकइच्छतींद्राये० शर्यणावतिसोममिंद्रःपिबतुवृत्रहा बलंद
धानआत्मनिकरिष्यन्वीर्यंमहदिंद्राये० आपवस्वदिशांपतआर्जीकात्सोममीढ्वः ऋतवाक्येनस

उप० त्येन श्रद्धयातपसासुतइंद्रायें० पर्जन्यवृद्धंमहिषंतंसूर्यस्यदुहिताभरत् तंगंधर्वाः प्रत्यगृभ्णंतंसोमे
रसमादधुरिंद्रायें० ऋतंवदन्नृतद्युम्नसत्यंवदन्सत्यकर्मन् श्रद्धांवदन्सोमराजंधात्रासोमपरिष्कृ
तइंद्रायें० सत्यमुग्रस्यबृहतःसंस्रवंतिसंस्रवाः संयंतिरसिनोरसाः पुनानोब्रह्मणाहरइंद्रायें०
9 यत्रब्रह्मापवमानछंदस्यांवाचंवदन् ग्राव्णासोमेमहीयतेसोमेनानंदंजनयन्निंद्रायेंदो० यत्र
ज्योतिरजस्रंयस्मिंल्लोकेस्वर्हितं तस्मिन्मांधेहिपवमानामृतेलोकेअक्षितइंद्रायें० यत्रराजा
वैवस्वतोयत्रावरोधनंदिवः यत्रामूर्यह्वतीरापस्तत्रमाममृतंकृधींद्रा० यत्रानुकामंचरणंत्रिना
केत्रिदिवेदिवः लोकायत्रज्योतिष्मंतस्तत्रमाममृतंकृधींद्रायें० यत्रकामानिकामाश्चयत्रब्रध्न
ऽस्यविष्टपं स्वधाचयत्रतृप्तिश्चतत्रमाममृतंकृधींद्रायें० यत्रानंदाश्चमोदाश्चमुदःप्रमुदआस
ते कामस्ययत्राप्ताःकामास्तत्रमाममृतं० यइंदोःपवमानस्यानुधामान्यक्रमीत् तमाहुःसुप्र
जाइतियस्तेसोमाविधन्मनइंद्रायें० ऋषेमंत्रकृतांस्तोमैःकश्यपोद्वर्धयन्गिरः सोमंनमस्नहो

स्यराजानंयोजज्ञेवीरुधांपतिरिंद्रा॰ सप्तदिशोनानासूर्याः सप्तहोतारऋत्विजः देवाऽआदित्यायेसप्ततेभिःसो
माभिरक्षनइंद्रा॰ यत्तेराजंन्छृतंहविस्तेनसोमाभिरक्षनः अरातीवामानस्तारीन्मोचनःकिंचनाममम
दिंद्रा॰ यत्रतत्परमंपदंविष्णोर्लोकेमहीयते देवैःसुकृतकर्मभिस्तत्रमाममृ॰ यत्रेलोकास्तनूत्यज
श्रद्धयातपसाजिता तेजश्चयत्रब्रह्माचतत्रमाममृतं॰ यत्रदेवाःमहात्मानःसेंद्राश्चमरुद्गणाः॥
ब्रह्माश्चयत्रविष्णुश्चतत्रमाममृतं॰ यत्रतत्परमाव्यंभूतानामधिपतिं भावभावीतयोगीश्वतत्रमा
ममृतं॰ यत्रतद्विष्णुर्महीयतेनराणांनराधिपतिः तत्रशंखगदाचक्रधारस्मरणमुक्तिश्चतत्रमाम
मृतं॰ यत्रगंगाचयमुनाचयत्रप्राचीसरस्वती यत्रसोमेश्वरोदेवःस्तत्रमाममृतंकृधीरिंद्रायेंद्रोपरि
स्रव तत्रप्रेतसमाप्येभुभिंगोमयेनोपलिप्यतत्रोपदर्भमयब्रास्तरणंनिमंत्र्यअद्येत्यादिकालंस्मृत्वा
प्राचिनावितिअमुकगोत्रस्यअमुकशर्मणःप्रेतस्यक्षुधोपशमनार्थंउत्थानबलिश्राद्धंकरिष्ये॥
अमुकशर्मणप्रेतस्यउत्थानबलिश्राद्धेक्षणमुपतिष्ठतु पाद्यंमु॰ अर्घ्यमु॰ अर्चनमु॰ आछादनमु॰

उप० इदंदास्यमानआमंसोमस्करंप्रेतायमु० पिंडप्रदानंकरिष्ये पिंडस्याधः दर्भासनमु० अमुकशर्मणः प्रेतस्य
क्षुधोपशमनार्थंउत्थानबलिश्राद्धेअयंसक्तुपिंडमुपतिष्ठतु तस्योपरितिलोदकं० अंजनं० गंधमु० पुष्प
धूपदीपनैवेद्यमु० फलतांबूलदक्षिणामु० दर्भशिखा० सव्येनअनादिनिधनोदेवोशंखचक्रगदाध
10 रः अक्षय्यपुंडरीकाक्षप्रेतमोक्षप्रदोभव पापाहामहाविष्णुःधर्मराजःप्रीयतांअभिरम्यतांजलंवि
सर्जयेत् ततोअद्येत्यादिकालंस्मृत्वा अमुकगोत्रस्यअमुकशर्मणः प्रेतस्यमार्गेश्वानभयनिवृत्यर्थं
श्वानबलिश्राद्धमहंकरिष्ये प्रेतस्यद्वौभुजसमीपेदर्भमयद्वे ब्राह्मणान्निमंत्र्यश्वानबलिश्राद्धेक्षण
मु० पाद्य० अर्घ्य० अर्चन० आच्छादनमु० इदंसोमस्करआमंप्रेताय० पिंडप्रदानंकरिष्ये॥ ॥
पिंड० दर्भासन० गोत्रस्यअमुकशर्मणः प्रेतस्यमार्गेश्वानबलिश्राद्धेअयंसक्तुपिंडमु० तस्योपरि
तिलोदकं० अंजन० अभ्यंजन० गंधपुष्पधूपदीपनैवेद्यफलतांबूलदक्षिणामु० सर्वंचोपति०
अतिद्रवसारमेयौश्वानौचतुरक्षौशबलौसाधुनापथा अथापितॄन्सुविदत्रांउपेहियमेनयेसध

मा दं मदंति यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ताभ्यामेनं परि देहि राजन्स्वस्ति चास्मा
अनमीवं च देहि ततो दह न देशतो वायव्यां दिशि स्मार्त्तोग्निं निदध्यात् यदि विछिन्नाग्निस्तर्हि यतो विछे
दस्तावत्कालगणनयाग्निविछेदप्रायश्चित्तं तदेव कुर्यात् संकल्पं यद्वा अद्येत्यादि देशकालौ स्मृत्वा
अमुकशर्मणः प्रेतस्य औपासनाग्निविछिन्नदिनादारभ्य एतावंतं कालं औपासनाग्निविछेदज
नितप्रत्यवायपरिहारार्थं प्रतिवर्षं गोनिष्क्रयद्रव्यं सत्तत्कांते ब्राह्मणेभ्यः संप्रददे अद्येत्यादि अमु
कशर्मणः प्रेतस्य औपासनाग्निविछेदनेयावद्भुन्नानां सायंप्रातर्होमानां तथा च दर्शपूर्णमास
स्थालीपाकानां व्रीह्याज्यं च संपत्तिपर्याप्तं तत्प्रत्याम्नायनिष्क्रयद्रव्यं सत्तत्कांते यथानाम गोत्रेभ्यो
ब्राह्मणेभ्यः संप्रददे ततः अद्येत्यादि अमुकशर्मणः प्रेतस्य अग्निविछेदननिमित्तं दाहाग्निसिध्य
र्थं प्रेताधानं करिष्ये इति संकल्प्य यथालाभमेतान्संभारान्संपाद्य तेषु लौकिकाग्निं प्रतिष्ठा
प्य ॐ भूर्भुवस्स्वरोमिति उल्लेखनाग्निं प्रतिष्ठाप्य तं कृत्वा अयाश्चेत्यस्य विमद ऋषिः अयाल ग्नि

उप०

देवतापंक्तिश्छंदः लौकिकस्याग्नेरौपासनत्वसिद्ध्ये आज्यहोमे वि० ॐ अयाश्चाग्नेस्यनभिशस्तीश्च स
त्यमित्त्वमया असि अयासावयसाकृतोयासन् हव्यमूहिषे यानोधेहि भेषजं स्वाहा अयसेअग्नये
इदंन० भूः स्वाहा अग्नय इदं० भुवः स्वाहा वायव इदं० स्वः स्वाहा सूर्याय इदं० भूर्भुवः स्वः स्वाहा प्रजाप
तय इदं० एवमौपासनं शुद्धं भवति पत्निमरणेप्येवं निरग्निकस्य ब्रह्मचर्यादेनिरग्निका यावाकपा
लाग्निः अग्निवर्णं कपालं तु कृत्वा तत्र विनिक्षिपेत् करिष्यादि ततो यस्तु जातः सतु कपालजः
अनुपनीताविवाहितयोरप्येवं विधवाविधुरयोरुत्तपनीयकः कपालाग्निरेव वा स्मेरग्निं च
प्रज्वाल्य पुनर्दर्भैस्तु संयुतः पुनर्दर्भैस्तृतीयग्निरेष रुत्तपनीयकः लौकिकेन सर्वेषां दाहः आ
हिताग्नेर्वैतानाग्निभिः ततः प्रेतस्य वायव्यां भूमौ निधानं दाहगर्त्तोदीशाने जानुमात्रं वितस्तिमा
त्रं वा गर्त्तं कृत्वा तत्रावकाशो वा लौकिकमुदकं च निक्षिपेत् इदं गर्त्तोदकं नाम ततः आचम्य॥
अमंत्रकप्राणायामं कृत्वा अद्येत्यादि देशकालौ संकीर्त्य अमुकगोत्रस्यामुकशर्मणः प्रेतस्य प्रे

नत्वविमोक्षार्थं और्ध्वदेहिकं करिष्ये इति संकल्प्य प्राचीनावीति भूमिं प्रार्थयेत् उपसर्पेति मंत्रस्य संकु
शिकऋषिः पितृमेधो देवता त्रिष्टुप् छंदः भूमिप्रार्थने विनि० ॐ उपसर्प मातरं भूमिमेतामुरुव्यचसं
पृथिवीं सुशेवां ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात् अपसर्पेतु ते प्रेताये
केचेदिह पूर्वजाः स्वस्ति नः कृणुत माशु प्रातः पुनरागमत् द्विजाता अप्सुजाता या जाता ओष
धीभ्यः अथो या अग्निजा आपः स्तानः शुंधंतु शुंधनीः इति भूमिं प्रोक्षयेत् अथ प्रोक्षणं अपेतवीति
मंत्रस्य यमऋषिः पितरो देवता त्रिष्टुप् छंदः भूमिप्रोक्षणे विनियोगः ॐ अपेतवीतविचसर्पतातो
स्या एतं पितरो लोकमक्रन् अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै इति गर्तोदकेन प्रो
क्षेदित्यनेन प्रतिप्रोक्षणं मंत्रावृत्तिः ततः यमाय दहनपतये चोल्लिखामि मध्ये कालाय दहनपतये
चोल्लिखामि इति उत्तरे मृत्यवे दहनपतये चोल्लिखामि ता दक्षिणे इति मंत्रेण खात्रयमायसे
नोल्लिखेत् ततः खाते हिरण्यशकलानि तिलांश्च प्रक्षिपेत् तिलोदकं निक्षिपेत् ततः मध्ये यमाय

२२

उप० दहनपतयेपितृभ्यःस्वधानमः ततःउत्तरेकालायदहनपतयेपितृभ्यःस्वधानमः ततःदक्षिणेमृ
त्यवेदहनपतयेपितृभ्यःस्वधानमः केचिल्लोहेल्लेखनकुर्वंति प्रेतस्योपरितिलोदकंक्षिप्त्वा ततः
सजातीयाहस्तेयज्ञकाष्ठेरेवदहनपर्याप्तंइत्यंकारयेत् तदुपरिबर्हिरास्तीर्यतदुपरिकृष्णाजिन
मूर्ध्वलोमंस्त्रिणीयात् ततःकर्त्ताप्रेतस्यमुखनासिकाद्वयेचक्षुर्द्वयेश्रोत्रद्वयेएवंसप्तछिद्रेषु
हिरण्यशकलानिनिक्षिपेत् तदभावेआज्यबिंदून्वा प्रेतस्यशरीरेघृताक्ताःतिलान्प्रक्षिप्य॥
अग्निपरिसमुह्यचित्तिसहिताग्निंपरिस्तीर्यदक्षिणतोग्नेःपर्युक्ष्य ततःपात्रासाधनं प्रोक्षणीं
स्रुवंचमसमाज्यभाजनंचेतिपात्राण्यासादयेत् प्रोक्षणीपात्रमुत्तानंकृत्वातत्रपवित्रेनिधायअ
द्भिःपूरयित्वातिलांनिक्षिपेत् पात्राण्युत्तानंकुर्यात् तत्रगर्त्तोदकंचमसेआसिच्यदर्भैःप्रच्छाद्यप्र
णयेत् कारिकायांतुवह्नेरुत्तरतःपात्रासादनंचमसप्रणयनंचप्रभृतमाज्यंबर्हिश्चोपकल्पये
त् इममग्नइतिदमनोग्निस्त्रिष्टुप् चमसानुमंत्रणेवि० ॐइममग्नेचमसंमाविजिह्वरःप्रियो

देवानामुतसोम्यानां एषयश्चमसोदेवपानस्तस्मिन् देवा अमृतामादयंते इतिपूर्वस्थापितचमसानुमंत्रणं
कुर्यात् शुक्लपक्षे हमंरणे प्रातराहुतिमारभ्य रात्रिमरणे सायमाहुमारभ्य पक्षहोमवन्मरणादिनादि
दशीपर्यंतेदिनसंख्यायाश्चतस्रः श्चतस्र आहुतीर्जुहुयात् अथप्रेतोपासनं अद्येत्यादिदेशकालौ
संकीर्त्य अमुकगोत्रस्य अमुकशर्मणः प्रेतस्य प्रेतोपासनं करिष्ये इतिसंकल्प्य समिद्द्वयमादाय अग्निं
कामं लोकं अनुमतिं एताः प्रधानदेवताः अग्नावाज्येन यक्ष्ये प्रेतं प्रेतोरसि आज्येन यक्ष्ये यद्वा एष
दाज्येन यक्ष्ये भूर्भुवस्स्वाहेति समिद्द्वयं जुहुयात् प्रजापतयइदं न ममेति त्यागः ततः चित्तिसहितमं
ग्निं पुनः परिसमुह्य परिस्तीर्य पर्युक्ष्य च तत्र छींमाज्यमुत्पूयस्रुवं न संमृज्यायं तत्र छींमलं कृत्य वामजा
नुं पातइत्वा प्राचीनावीतिस्रुवेण प्रधानहोमं जुहुयात् अग्नये स्वाहा अग्नय इदं० कामाय स्वा
हा कामायेदं० लोकाय स्वाहा लोकायेदं० अनुमतये स्वाहा अनुमतय इदं० इत्यग्नावाज्येन ततः
प्रेतोपरि अस्माद्वैत्वमजायथा अयंत्वधिजायतां असौ अमुकशर्मणे प्रेताय स्वर्गाय स्वाहा प्रेतस्या

उ पा०

13

रस्मिष्टषद्राऽज्येनोरस्मिअसावितिपदस्याग्नेः पुंसस्त्रियोवाप्रेतस्यसंबुद्धिंनामनिर्दिशेत् स्विष्टकृतादि
नास्तिपात्रयोजनेनास्ति पिष्टपिंडदानंकेचित्तेतोपासनात्पूर्वंअन्येतुनैवकुर्वंति ततोदहनंअग्निं
प्रज्वालयेत् पुंसःशिरोदेशे स्त्रियाःपाददेशेइत्याहुः तत्रमंत्रः क्रव्यादमिमित्यमोग्निस्त्रिष्टुप् अग्नि
प्रज्वालनेवि० ॐक्रव्यादमग्निंप्रहिणोमिदूरंयमराज्ञोगच्छतुरिप्रवाहः इहैवायमितरोजातवेदादे
वेभ्योहव्यंवहतुप्रजानन् इत्यग्निंप्रज्वाल्य ततोवस्त्रपल्लवेनचितोवायुःकार्यइतिकेचित् ततःवाता
स्तेवातुपथिभिः पुण्यगंधामनःसुखागात्रसुखानुलोमाः त्वचःसुखामांससुखाअस्थिसौख्यावहं
तुत्वामरुतःसुकृतांयत्रलोकाः इमाआपोमधुमत्यास्मिंस्तेलोकउपदुह्यतामक्षीयमाणास्वधानमः १
वातास्तेवांतु० इमाआपोमधुमत्योंतरिक्षेतेलोकउपदुह्यतामक्षीयमाणास्वधानमः २ वातास्तेवां
तुपथि० इमाआपोमधुमत्यःस्वर्गेलोकेउपदुह्यतामक्षीयमाणाःस्वधानमः इतिवस्त्रपल्लवैः ततो
दह्यमानंप्रेतंतैरनुमंत्रणंमंत्रैः प्रेहिप्रेहीतिद्वयोःयेमः पितरस्त्रिष्टुप् दह्यमानप्रेतानुमंत्रणेविनियो०

ॐ प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेयुः उभा राजाना स्वधया मदंता यमं पश्यासि वरुणं च देवं
संगछस्व पितृभ्यः सं यमेनेष्टापूर्तेन परमे व्योमन् हित्वायावद्यं पुनरस्तमेहि संगछस्व तन्वा सुवर्चाः अ
तिद्रवेति द्वयोर्यमश्वानो त्रिष्टुप् दह्यमानप्रेतानुमं० ॐ अतिद्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना
पथा अथा पितॄन्त्सुविदत्राँ उपेहि यमेन ये सधमादं मदंति यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी
नृचक्षसौ ताभ्यामेनं परिदेहि राजन्त्स्वस्ति चास्मा अनमीवं च धेहि मैनमग्नमिति पंचानां दमन ऋषिः
अग्निर्देवता त्रिष्टुप् छंदः दह्यमानप्रेतानुमं० ॐ मैनमग्ने वि दहो माभि शोचो मास्य त्वचं चिक्षिपो मा शरी
रं यदा शृतं कृणवो जातवेदोऽथेमेनं प्र हिणुतात्पितृभ्यः शृतं यदा करसि जातवेदोऽथेमेनं परि दत्तात्पितृभ्यः
यदा गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं
च धर्मणा अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः अजो भागस्तपसा तं तपस्व तं ते
शोचिस्तपतु तं ते अर्चिः यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकं अव सृज पुनरग्ने पि

३५० तेभ्योयस्त्वआहुतश्चरतिस्वधाभिः आयुर्वसानउपवेतुशेषः संगछतांतन्वाजातवेदः यत्तेकृष्णः शकुन
आतुतोदपिपीलः सर्पउतवाश्वापदः अग्निष्टद्विश्वादगदंकृणोतुसोमंश्चयोब्राह्मणाँआविवेश पू
षात्वेतिचतसृणां वेदश्चवापूषास्त्रिष्टुप् दह्यमानप्रेतानुमं० ॐपूषात्वेतश्च्यावयतुप्रविद्वाननष्टपशु
र्भुवनस्यगोपाः सत्वैतेभ्यः परिददत्पितृभ्योग्निर्देवेभ्यः सविदत्रियेभ्यः आयुर्विश्वायुः परिपासतित्वा
पातुप्रपथेपुरस्तात् यत्रासतेसुकृतोयत्रतेययुस्तत्रत्वादेवः सविताद्धातु पूषेमाआशाअनुवेदस
र्वाः सोअस्मांअभयतमेननेषत् स्वस्तिदाआघृणिः सर्ववीरोप्रयुछन्पुरएतुप्रजानन् प्रपथेपूषा
प्रजनिष्टपूषाप्रपथेदिवः प्रपथेपृथिव्याः उभेअभिप्रियतमेसधस्थेआचपराचरतिप्रजानन् उपस
र्पेतिचतसृणां संकुशिकऋषिः पितरोदेवता आद्यास्त्रिष्टुप् द्वितीयाप्रस्तारपंक्तिः तृतीयात्रिष्टु
प् चतुर्थीजगती दह्यमानप्रेतानुमं० ॐउपसर्पमातरंभूमिमेतामुरुव्यचसंपृथिवींसुशेवां ऊर्ण
म्रदायुवतिर्दक्षिणावतएषात्वापातुनिर्ऋतेरुपस्थात् उछ्वंचस्वपृथिविमानिबाधथाः सूपायना

स्मैभवस्त्रपवंचना मातापुत्रंयथासिचाभ्येनंभूमउर्णुहि उछ्वंचमानापृथिवीसुतिष्ठतुसहस्रंमिउपहि
श्रयंतां तेगृहासोघृतश्चुतोभवंतुविश्वाहास्मैशरणाः संत्वत्र उत्तेस्तभ्नामिपृथिवींत्वत्परीमंलोगंनिद
धन्मोअहंरिषं एतांस्थूणांपितरोधारयंतुतेत्रायमः सादनातेमिनोतु सोमएकेभ्यइतिपंचानांय
मोभावदृतोनुष्टुप् दह्यमानप्रेतानु० ॐसोमएकेभ्यः पवतेघृतमेकउपासते येभ्योमधुप्रधावतितां
श्चिदेवापिगच्छतात् तपसायेअनाधृष्यास्तपसायेस्वर्ययुः तपोयेचक्रिरेनहस्तांश्चिदेवापि० ये
युध्यंतेप्रधनेषुशूरासोयेतनूत्यजः येचासहस्रदक्षिणास्तांश्चिदेवा० येचित्पूर्वऋतसापऋतावा
नऋतावृधः पितॄन्तपस्वतोयमस्तांश्चिदेवा० सहस्रणीथःकवयोयेगोपायंतिसूर्यं ऋषीनंपस्व
तोयमतपोजां अपिगच्छतात् ऊरूणसावितियमश्वानौत्रिष्टुप् दह्यमानप्रेतानु० ऊरूणसोवसुतपा
उदुंबलौयमस्यदूतोचरतोजनांअनु तावस्मभ्यंदृशयेसूर्यायपुनर्दातावसुमद्येहभद्रं इत्युपस्था
नं ततःप्रेतस्यउत्तरभागस्थीत्वा ॐ दक्षिणाभिमुखेनप्रतिमंत्रांतेएतानजपन्न् दह्यमानप्रेतोप

उ५०

रितिलान्क्षिपेत् ततः उदकुंभंसव्येनागृहीत्वास्फुटितश्लक्ष्णउपलेनपृष्ठभागेछिद्रं कृत्वाप्रेतपादेरप्र
दक्षिणंत्रिःपरिव्रजंजपेत् तत्रमंत्रः वातास्तेवांतु पथिभिःपुराणगंधामनः सुखागात्रसुखानुलोमाः
त्वचःसुखामांससुखाअस्तिसोख्याव्रहेतुत्वामकृतः सुकृतायत्रलोकाः इमाआपोमधुमत्योस्मिंस्ते
लोकउपदह्यतामक्षाय्यमाणाः स्वधानमः इतिएकवारंपरिक्रम्यपाददेशेएवस्थित्वा अश्मना
कलशेद्वितीयछिद्रंकृत्वाव्रजनजपेत् वातास्तेवांतु० त्वचःसु० इमाआपोमधुमत्योंतरिक्षेतलो
कउपडुह्यतामक्षाय्यमाणाः स्वधानमः पुनस्त्रितीयछिद्रं कृत्वाव्रजनजपेत् वातास्तेवांतु० त्व
चःसु० इमाआपोमधुमत्यः स्वर्गेतेलोकउपडुह्यतामक्षाय्यमाणाः स्वधानमः इतितृतीयं० प
रिक्रमणंचसर्वेषांसगोत्राणां एतैस्त्रिरप्रदक्षिणीकृत्यप्रेतस्यपाददेशेकुंभंस्फोटयित्वापृष्टतो
नवेक्ष्यमाणाः ततःसव्यमावृत्यकनिष्ठपूर्वकान्निर्गछेयुः इमेजीवेतिसंकुशिकोमृत्युस्त्रिष्टुप्
सव्यमावृत्यगमनेवि० ॐइमेजीवाविमृतेराववृत्रंनभूद्भद्रादेवहूतिर्नोअद्य प्रांचोअगामनृतये

हसायद्राधाय आयुः प्रतरं दधाना अयं मंत्रः कर्तुरेव जयंतेन सर्वेषां ततो यत्र प्रवाहहुदकं भवति दिनद्वा
हे आतारकोदयात् रात्रिदाहे आदित्योदयात् शवस्पर्शिनामप्येवं ततः कर्त्ता तु आर्द्र वस्त्रं परिधाय अ
द्येत्यादि देशकालौ संकीर्त्य अपसव्यं कृत्वा अमुकगोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तम
लोकप्राप्त्यर्थं मरणदिनादारभ्य प्रथमेऽन्हि विहितं मृत्तिकास्नानपूर्वकं तिलांजलिपूर्वकं पिंडदानपू
र्वकं प्रथमदिनविधिं करिष्ये इति संकल्प्य ताम्रादिमयं नवभाण्डे पिंडार्थं हविः श्रपयित्वा गोत्रस्यामु
कशर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं दाहजनिततापोपशमनार्थं मृत्तिकास्नानं
करिष्ये उदुत्यमित्येकऋक् १ मृदं गृहीत्वा सूर्याय दर्शयेत् ॐ उदुत्यं जातवेदसं देवं वहंति केतवः
दृशे विश्वाय सूर्यं इति सूर्यं दर्शयित्वा शिरसि निधाय सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपा
त् स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं इति लिंपेत् अंगादंगादिति सर्वांगे अंगादंगाल्लोम्नोलो
म्नो जातं पर्वणि पर्वणि यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते इति आद्येऽहनि मृत्तिकास्नानं ॥

उ० प०

16

मु

त्रिवारं कुर्यात् स्नात्वाचम्य अमुकगोत्रस्य अमुकशर्मणः प्रेतस्य प्रेतत्वनिवृत्त्यर्थं दाहजनितपीडात्
षापशमनार्थं तिलतोयांजलिदानं करिष्ये कुशेषु स्नानं प्रतिष्ठाप्य केशवादिद्वादशनामभिः स्नाप
यित्वा दक्षपक्षे शंकर्षणादिद्वादशनामभिः सव्येन अस्योपरि दद्यात् ततः अपसव्यः अमुकगोत्रस्या
मुकशर्मणः प्रेत० प्रथमेहनि विहितं दाहजनिततापोपशमनार्थं एष ते तिलतोयांजलिमुप० इति
दक्षिणाभिर्खा दद्यात् प्रत्यहं त्र्यहं त्रयं वा एवं दशाहांते त्रिंशत् सव्येन अमुकगोत्रस्यामुकशर्मणः
प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं दाहजनिततृषोपशमनार्थं सव्येन वासोदकमुपतिष्ठ०
ततः प्राचिनावीती गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वविमोक्षार्थं उत्तमलोकप्राप्त्यर्थं आद्येहनि प्रे
तस्य शिरोवयवनिष्पत्त्यर्थं हविरन्नादनं करिष्ये हविःश्रपयित्वा ततः गोत्रस्यामुकशर्मणः प्रेतस्य प्रे
तत्वविमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं प्रथमेहनि विहितपिंडप्रदानं करिष्ये पिंडस्याधः दर्भासनमुप
तिष्ठतु इमं लोकं परित्यज्य गतोसि परमां गतिं अनस्त्वां विष्णुरूपेण कुशासं स्थापयाम्यहं तस्योपरि

तिलोदकमुपतिष्ठतु ततः गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं आद्येऽहनि
प्रेतस्य शिरोवयवनिष्पत्यर्थं अयं चरुपिंडमुप० पिंडस्योपरि तिलोदकमुप० अंजनमु० अभ्यंजनमु०
गंधं० पुष्पं० भृंगराजमु० धूपं० दीपमु० नैवेद्यं० फलतांबूलदक्षिणामु० दर्भशिखामुप० स
र्वं चोपतिष्ठतां सव्यं अनादिनिधनो देवो शंखचक्रगदाधरः अक्षय्यपुंडरीकाक्ष प्रेतमोक्षप्रदो भ
व इति मंत्रं पठेत् एतत्पिंडदानेन सतिलोदकं प्रेताप्यायनपापाहाधर्मराजः प्रियतां अभिरम्यतां ज
लं विसर्जयेत् पिंडं उदके निक्षिपेत् स्नात्वाचम्य अथ प्रथमेऽह्नि तृतीये च पंचमे सप्तमे तथा न
वमे एकादशे चैव तन्नवश्राद्धमुच्यते इति वचनात् नवश्राद्धे मंत्राभावः आचम्य प्राणानायम्य तिथ्या
दि स्मृत्वा अमुकगोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं क्षुधोपशमनार्थं
आद्येऽहनि विषमश्राद्धं करिष्ये गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकप्रा० विषम
श्राद्धे क्षणमु० अर्घ्यं० अर्चनमु० आच्छादन० विषमश्राद्धे दास्यमान आमं सोपस्करं सोदकुंभं प्रेताय

उप० उपतिष्ठतु गोत्रस्यामु० विषमश्राद्धे पिंडप्रदानं करिष्ये पिंडस्याधः दर्भासनमस्तु० तस्योपरि तिलोदकं गो
त्रस्यामुकशर्मणः प्रेतस्य प्रेतत्व० क्षुधोपशमनार्थं विषमश्राद्धे अयं सक्तुपिंडमस्तु० पिंडस्योपरि तिलोद
17 कं अंजनादि दक्षिणांतः सर्वे उपचारमुपतिष्ठतां अनादिनिधनो देवो० अभिरम्यतां जलं विसर्जये
त् ततः स्नात्वाचम्य देशकालौ संकीर्त्य गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोक०
प्रथमेहनि विहितं नग्नप्रच्छादनश्राद्धं करिष्ये क्षणपाद्यअर्घ्यआच्छादनादि पूर्ववत् दत्त्वा गोत्रस्यामु
कशर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं नग्नप्रच्छादनश्राद्धे इदं दास्यमानं अमं चान्नं
यथाशक्ति सोपस्करं सघृतं सोदकुंभं सवस्त्रद्वयं सकांस्यभाजनद्वयं यथाशक्ति सुवर्णरजतलोहते
ल सदक्षिणोपेतं सोपानहं सकमंडलासनं सच्छत्रं सोदकपात्रं प्रेताय उपतिष्ठतां गोत्रस्यामुकश
र्मणः प्रेतस्य० नग्नप्रच्छादनश्राद्धे पिंडप्रदानं करिष्ये पिंडस्याधः दर्भासन० गोत्रस्यामुकशर्म० प्र
थमेहनि नग्नप्रच्छादनश्राद्धे अयं च ते पिंड उपतिष्ठतु अंजनादि विसर्जनांतं पूर्ववत् कृत्वा ततः अ

द्येत्यादिदेशकालमुच्चा॰ प्रथमेहनि विहितं मनुष्यलोकात्प्रेतलोकगमनार्थं पाथेयश्राद्धं करिष्ये क्षणपा
अर्घ्याच्छादनादि पूर्ववत् पिंडप्रदानतिलोदकानंजनादिविसर्जनांतं पूर्ववत् ततः गोत्रस्यामुकशर्मणः
प्रेतस्य प्रेतत्व॰ प्रथमेहनि विहितं दशदानमध्ये गोदानं करिष्ये उ गावो मे अग्रतः संतु गावो मे संतु पृष्ठ
तः गावो मे हृदयं संतु गवां मध्ये वसाम्यहं अनेन गोदानेन प्रेतत्वान्नायेन निष्क्रयद्रव्यं सूतकांते यस्मैक
स्मै ब्राह्मणेभ्यः संप्रददे न मम इति प्रथमदिनविधिः समाप्तः॥ तत्वतश्च प्रथमे द्वितीये च तृतीये चतु
र्थे सप्तमे नवमे वा कार्यं अथ द्वितीयदिने कृत्वा पूर्वदिनकृत्यस्थले गत्वा स्नानांतमुक्त्वा अद्येत्या
दिदेशकालौ संकीर्त्य प्राचीनावीति पवित्रे धृत्वा गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं ज
नमलोकप्राप्त्यर्थं द्वितीयेहनि विहितं मृत्तिकास्नानपूर्वकतिलांजलिपूर्वकपिंडदानपूर्वकद्वितीय
दिनविधिं करिष्ये तत्र कृत्वा मृत्तिकास्नानं पूर्ववत् कृत्वा अश्मोपरि पूर्ववत् तिलतोयांजलिं द
द्यात् पूर्ववत् हविश्रपयित्वा गोत्रस्यामुकशर्मणः प्रेतस्य चक्षुश्रोत्रनासावयवनिष्पत्त्यर्थं अयं

उप० चरुपिंडमुपतिष्ठतु पिंडस्योपरि तिलोदकं० अंजनादिविसर्जनांतं पूर्ववत् कृत्वा ततः दशाहदानमध्ये
भूमिदानं॥ ॥सर्वभूताश्रया भूमिर्वराहेण समुद्धृता अनंतसस्यफलदा अतः शांतिं प्रयच्छ मे अने
18 न भूमिदानेन तत्रस्याम्नायुनिश्रेयइद्रव्यं सतकांतेयस्मेक० इति द्वितीयदिनविधिः अथ तृतीयदि
न कृत्यं स्नात्वाचम्य अद्येत्यादि पूर्ववत् तृतीयदिनविधिं करिष्ये मृत्तिकास्नानं कृत्वा केशवादि द्वा
दशाना० अस्मोपरि तिलतोयांजलिदानं पूर्ववत्० गोत्रस्य० प्रेतस्य तृतीयेऽहनि भुजो वक्षोग्रीवामुखा
वयवनिष्पत्त्यर्थं अयं चरुपिंडमुपतिष्ठतु पिंडस्योपरि तिलोदकं अंजनांतं विसर्जनांतं पूर्ववत् कृत्वा॥ ॥
ततः विषमश्राद्धं कुर्यात् पूर्ववत् विषमश्राद्धं कृत्वा ततो दशाहदानमध्ये तिलदानं महर्षेर्गोत्रसंभूताः
काश्यपस्य तिलाः स्मृताः तस्मात्तेषां प्रदानेन मम पापं व्यपोहतु अनेन तिलदानेन तत्रयाम्नायुद्रव्यं
सतकांतेयस्मेक० इति तृतीयदिनकृत्यं अथास्थिसंचयनं ततः दाहदेशं गत्वा वयवपिंडानंतरं अस्थिसं
चयनं कार्यं आचम्य प्राणानायम्य देशकालौ स्मृत्वा प्राचीनावीति गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्व

विमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं अस्थिसंचयनं करिष्ये शमीशाखया सक्षीरोदकेनापसव्येन परिक्रामं त्रिः ३
श्मशानदेशं शीतिकेति मंत्रेण चितिं प्रोक्षयेत् शीतिकेति मंत्रं दमनोऽग्निस्त्रिष्टुप् अस्थिप्रोक्षणे विनि०
ॐ शीतिके शीतिकावति ह्लादिके ह्लादिकावति मंडूक्या ३ सुसंगमइमं स्वग्निं हर्षय अनेन मंत्रेण
पादादारभ्य सर्वां चितिं प्रोक्षयेत् ततो गोमयेन श्मशानदेशमुपलिप्य तत्र त्रिकोणवेदिं कृत्य हरिद्रा
दीनालं कृत्य ततोपरि सोदकुंभं त्रयं स्थाप्य तत्र मध्ये सतिलदर्भं क्षिप्त्वा तस्योपरि रिक्तात्रयं स्थाप्य ए
कैकदर्भं निधाय तस्योपरि महान्तं भक्तपिंडं च स्थापयेत् अमुकगोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्व
विमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं मरणदिनादारभ्य तृतीयेहनि विहितं मध्ये प्रेताय भोजनार्थं मयं पिंडः
पानार्थं चोदकुंभमुपतिष्ठतु तस्योपरि तिलोदकमस्तु० ततः उत्तरतः श्मशानवासिने रुद्रायायं पिं
डमस्तु० ततः दक्षिणतो यमायेति पिंडं दद्यात् इति त्रिः ३ पिंडानंतरं ततः क्रमेण गोत्राद्युच्चार्य पोलिकात्र
यं पादुकाषट्कं श्मशानवासिने रुद्राय दक्षिणतो यमाय उपलवाधानिरशनार्थं इदं छत्रमुपतिष्ठतु॥

१९

उप० एवमेवसर्वेषां क्षुधाबाधानिरशनार्थं इयं पोलिकामु० कंटकबाधानिरशनार्थं इयं पादुकामु० वायुबा
धानिरशनार्थं इयं ध्वजाकामुपति० ततः कुंभत्रयं रोटिकात्रयं पिंडत्रयं छत्रत्रयं पोलिकात्रयं पादुका

19 षट्कं ध्वजाकात्रयं कालायदहनपतये मृत्यवेदहनपतये यमायदहनपतये पितृभ्यः स्वधा नम इदमु
पतिष्ठतां इति क्रमेण दद्यात् ततः अमुकगोत्रस्यामुक० उत्तमलोकप्राप्त्यर्थं तृतीयेहनि विहितं
अस्थिसंचयनश्राद्धं करिष्ये क्षणपाद्यं अर्घ्यमर्चनमाच्छादनादि पूर्ववत् दद्यात् गोत्रस्यामु० प्रे
तस्य० अस्थिसंचयनश्राद्धे अयं चरुपिंड उप० तत्रोपरि तिलोदकादि विसर्जनांतं कृत्वा ततः स्नाया
त् इत्यस्थिसंचयनं॥ ॥अथ चतुर्थदिनकृतं स्नात्वाचम्य देशकालौ स्मृत्वा प्राचीनावीति संकल्पा
दि पूर्ववत् अंजलयः पूर्ववत् अद्येत्यादि उक्त्वा प्रेतस्य पार्ष्णिकटिकुक्षिगुदलिंगाद्यवयवनिष्पत्त्यर्थं
अयं चरुपिंडमुपतिष्ठतामिति तिलोदकादि पिंडप्रवाहांतं कुर्यात् ततः दशदानमध्ये हिरण्यदानं
करिष्ये॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः॥ अनंतपुण्यफलदा मतः शांतिं प्रयच्छ मे अनेन हि

रल्पदानेन तत्सत्याम्नायद्रव्यं सततकांतेयस्मै कस्मै॰ अथ पंचमदिनकृत्यं स्नात्वाचमनं कृत्वा देशकालो
संकीर्त्य संकल्पादि पूर्ववत्॰ अंजलयः पूर्ववत्॰ गोत्रस्यामुकशर्मणः प्रेतस्य ऊरुजानुजंघावयवनिष्प
त्यर्थं अयं चरुपिंडमुप॰ तिलोदकादि पिंडप्रवाहनांतं पूर्ववत् ततः पूर्वोनुक्रमेण विषमश्राद्धं कृत्वा॥
ततः दशदानं॰ आज्यदानं॰ कामधेनुप्रसंभूते सर्वत्र तुष्टु संस्थिते देवानामाज्यमाहारमतः शांतिं
प्र॰ अनेन आज्यदानेन तत्सत्याम्नायद्रव्यं सततकांतेयस्मै क॰ इति पंचमदिनं अथ षष्ठमदिनकृत्य॥
स्नात्वाचम्य संकल्पादि पूर्ववत् अंजलयः पूर्ववत्॰ अद्येत्यादि॰ प्रेत॰ गुल्फपादांगुलिमर्माघवयवनि
ष्पत्यर्थं अयं चरुपिंडमु॰ तिलोदकादिविसर्जनांतं पूर्ववत्॰ ततः दशदानमध्ये वस्त्रदानं क॰ शरणं
सर्वलोकानां लज्जायारक्षणं परं सुवेशधारणं वस्त्रमतः शांतिं प्र॰ अनेन वस्त्रदानेन तत्सत्याम्ना॰
इति षष्ठमदिनं अथ सप्तमदिनं कृत्य स्नात्वाचम्य देशकालो॰ संकल्पादि पूर्ववत्॰ अंजलयः पू
र्ववत् अद्येत्यादि प्रेतस्य अस्थिमज्जाशिरावयवनिष्पत्यर्थं अयं चरुपिंडमुपतिष्ठतु तिलोदकादि

पूर्ववत् ० ततोविषमश्राद्धंपूर्ववत् ततः दशदानमध्येधान्यदानं क० सर्वमेवमयंधान्यंसर्वोपत्तिक
रंमहत् प्राणिनांजीवनोपायमतःशांतिप्रयच्छमे इतिधान्यदानेनस्तृतकांतेयस्मै० इतिसप्तम
दिनं अथाष्टमदिनेकृत्यं स्नात्वाचम्य संकल्पादिपूर्ववत् अंजलयःपूर्ववत् अद्येत्यादि प्रेत
नखलोमाद्यवयवनिष्पत्त्यर्थंअयंचरुपिंडमुप० तिलोदकादिपिंडप्रवाहनांतेपूर्ववत् ततः द
शदानमध्येगुडदानं क० तथारसानांप्रवरःसदैवेक्षुरसोमतः ममतस्मात्परांलक्ष्मींददस्वगुड
सर्वदा इतिगुडदानेनस्तृतकांतेयस्मै० इतिअष्टमदिनं अथनवमदिनेकृत्यं स्नात्वाचम्यदेशका
लौस्मृत्वा संकल्पादिपूर्ववत्कृत्वाअंजलयःपूर्ववत् अद्येत्यादिप्रेतस्यसर्ववीर्यसंपत्तिःअयंच
रुपिंडमुपतिष्ठतामितितिलोदकादिपिंडप्रवाहनांतंपूर्ववत् ० ततःविषमश्राद्धंपूर्ववत् पिंडांते
दशदानमध्येरौप्यदानं क० प्रीतिर्यतःपितृणांचविष्णुशंकरयोःसदा शिवनेत्रोद्भवंरौप्यम
तःशांतिप्रयच्छमे इतिरौप्यदानेनस्तृतकांतेयस्मैक० इतिनवमदिनं अथदशमदिनेकृत्यं स्

द्वाचारमाह प्रातरुत्थाय स्पृष्टानां भांडानां त्यागः गृहानुलेपनं सर्वेषां सापिंडानां सचैलस्नात्वानं कृत्वा
स्पृष्टवस्त्रं प्रक्षाल्य ततः कर्त्ता प्राचीनावीति संकल्पादि अंजलयः पूर्ववत् अद्येत्यादि प्रेतस्य क्षुत्पिपा
सानिवृत्त्यर्थं अयं चरुपिंड उपतिष्ठतामिति तिलोदकांतं पिंडप्रवाहनादि कुर्यात् ततः दशाहदानमध्ये ल
वणदानं कु० यस्मादन्नरसाः सर्वे नाल्कृष्टलवणं विना शंभोः प्रीतिकरं नित्यमतः शांति० इति लवण
दानस्मृतं कांते यस्मै० अथ दशमेऽह्नि कार्या बलिश्राद्धं ततो मृदा त्रिकोणां वेदीं कृत्वा गोमयेनोपलिप्य
हरिद्रादीनालंकृत्य तत्र कुंभत्रयं संस्थाप्य तस्योपरि शराटिकात्रयं संस्थाप्य तत्रोपरि एकैकं दर्भं निधाय तत्रो
परि महांतं भक्तपिंडं चरुस्थापयेत् गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं
मरणादिनादारभ्य दशमेऽहनि विहितं मध्ये प्रेताय क्षुत्पिपासानिवृत्त्यर्थं अयं पिंडः पानार्थं मोदकं
भक्तमुपतिष्ठतु अयं मध्ये तस्योपरि तिलोदकं दत्वा तथैव उत्तरतः प्रेतशिखिभ्यः इति दद्यात् तथैव
दक्षिणतो यमायेति दक्षिणस्यां दद्यात् ततः गोत्राद्युच्चार्य पूर्ववत् मध्ये प्रेताय उत्तरतः प्रेतसखिभ्यः

उप०

दक्षिणतो यमाय उष्णबाधानिरशनार्थं अयं छत्रमुपतिष्ठतु ॥ एवमेव संवेविवेद्य क्षुधाबाधानिरशनार्थं अयं
पोलिकामुप० कंटकबाधानिरशनार्थं अयं पादुकामु० वायुबाधानिरशनार्थं पताकामु० गोत्रस्यामुकश
र्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं मध्ये प्रेताय उत्तरतः प्रेतसखिभ्यः दक्षिणतो यमाय
कुंभत्रयं रोटिकात्रयं पिंडत्रयं छत्रत्रयं पोलिकात्रयं पादुकाषट्कं पताकात्रयं कालाय दहनेपतये मृत्य
वे दहनपतये यमाय दहनपतये पितृभ्यः स्वधा नमः ततः संकल्पादि पूर्ववत् काकबलिश्राद्धे अस्मोपरि
क्षणमुप० पाद्य अर्घ्य० अर्चन० छादन० काकबलिश्राद्धे पिंडप्रदानं करिष्ये गोत्रस्यामुकशर्मणः प्रे
तस्य० काकबलिश्राद्धे अयं चरुपिंडमु० तस्योपरि तिलोदकं अंजनादि विसर्जनांतं पूर्ववत् ततो वायसं
प्रार्थ्य ततो मध्यमप्रेतपिंडं वायसो भक्षयंति तावत्तिष्ठेत् ततः अस्मानं तैलेनाभ्यंज्य नदीतीरे निधाय
ततः कर्त्ता सर्वे बांधवाः संबंधिनाश्च स्नायात् अद्रवस्त्रेण सहितं अस्मोपरि त्रीन् त्रीन् धर्मोदकांति
लांजलीं प्रेतोद्देशेन जलतीरे दद्युः ततः कर्त्ता अस्मानं प्रार्थ्य इमं लोकं परित्यज्य गतोसि परमां गतिं

ततो दिव्येन देहेन कुशेत्वाहं नियोजयेत् इत्यश्मानमुदके क्षिपेत् ततः सर्वे सगोत्राः यथा देशाचारं तिला
मलकादिस्नाः शुष्कवाससो गृहीत्वा गृहे गत्वा सर्वे न चैव भुंजीरन् इति काकबलिश्राद्धविधिर्दशाहदिनकृ
त्यं समाप्तं तत्रैकादशाहदिनविधिः ततः प्रातरुत्थाय स्पृष्टानां भांडानां त्यागः सचेलं स्नात्वा स्पृष्ट
वस्त्रं प्रक्षाल्य पूर्वोक्तमार्गेण पंचगव्यप्राशनं यज्ञोपवीतधारणं कुर्यात् तत्रैत्यादि वृषश्राद्धमेकोदि
ष्टं पिंडप्रवाहनं स्नानांतं प्रागुक्तविषमदिनवत्कुर्यात् शिवस्वामिमतेनैतत् पंचैव नवश्राद्धानि पूर्वो
क्तानि तन्मते ततो महैकोदिष्टं शक्तिर्नास्ति तत्रैव अग्नावेकोदिष्टविधिः अथ द्विजाभावे एकोदिष्टश्रा
द्धविधिः ग्रामाद्बहिः शुचौ देशे गोमयेनोपलिप्ते देशे व्याहृतिभिरग्निं प्रतिष्ठाप्य तत्र प्रयोगः देशका
लौ संकीर्त्य अपसव्यं गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं एकादशे
ऽहनि विहितं द्विजाभावे अग्नावेकोदिष्टश्राद्धं करिष्ये इति संकल्प्य तदंग स्थंडिलं उपलेपनं उ
ल्लेखनं भस्त्रं वस्त्ररोमित्यग्निं प्रतिष्ठाप्य चत्वारिंशं गा इति ध्यात्वा परिसमूहनं त्रिः ३ दक्षिणाग्रपरि

22

उ५०

स्मरणं चतुः पर्युक्षणं त्रिः तूष्णीमलंकृत्य गंधादिभिरभ्यर्च्य द्विजवदग्निसमीपे गोत्रस्यामुकशर्मणः प्रेतस्य
प्रेतत्वविमु० एकादशेहनि द्विजाभावे अग्नावेकोद्दिष्टश्राद्धं सम्पन्नमुपतिष्ठतु एवं सर्वे पाद्य० अर्घ्य० अ
र्चन० आच्छादन० अग्निसमीपे पूर्ववदर्घ्यः अमुकगोत्रायेत्यादि प्रेताय स्वाहेत्यग्नामेकाहुतिअग्नौ
करणमुपतिष्ठतुमितिहोमः परिवेषणादिसंकल्पदाहुतिग्रासमिताः पुरस्करस्यान्नस्य जुहुयात्।
इदं न ममेति विसर्जयेत् ततः उदीरतेत्यष्टर्चस्य शंखपितरस्त्रिष्टुप् महैकोद्दिष्टान्नहोमे विनियोगः॥
ॐ उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः असुं य ईयुरवृका ऋतज्ञास्ते नो वंतु पितरो ह
वेषु स्वाहा १ ॐ इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ये पार्थिवे जेरेस्या निषत्ता ये
वा नूनं सुवृजनासु विक्षु स्वाहा २ ॐ आहं पितॄन्सुविदत्रां अविस्सि नपातं च विक्रमणं च विष्णोः
वर्हिषदो ये स्वधया सुतस्य भजंत पित्वस्त इहागमिष्ठाः स्वाहा ३ ॐ बर्हिषदः पितर ऊत्या १ र्वागिमा
वो हव्या चकृमा जुषध्वं त आगतावसा शंतमेनाथा नः शंयोररपो दधात स्वाहा ४ ॐ उपहूताः

पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु त आगमंइत स्तु वंत्वधि ब्रुवंतु तेवंस्वस्मान् स्वाहा ५ ॐ आच्या
जानु दक्षिणतो निषद्येमं यज्ञमभिगृणीत विश्वे माहिंसिष्ट पितरः केनचिन्नो यद्व आगः पुरुषता करा
मस्वाहा ६ ॐ आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय पुत्रेभ्यः पितरः तस्य वस्वः प्रय
छत त इहोर्जं दधात स्वाहा ७ ॐ ये नः पूर्वे पितरः सोम्यासो नूहिरे सोमपीथं वसिष्ठाः तेभिर्यमः सं
रराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु स्वाहा ८ एतैर्मन्त्रैः चतुर्वारमावर्त्तयेत् एवं द्वात्रिंशदाहुती
र्हुत्वा उच्छिष्टपिंडोदनेयः अग्निसमीपे एकपिंडः पूर्ववद्देयः ततः गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्व
वि० पिंडप्रदानं करिष्ये पिंडस्याधः दर्भासनमुप० गोत्रस्यामुकशर्मणः प्रेतस्य प्रेत० एकादशेहनि वि
हितं आग्नावेकोद्दिष्टश्राद्धे अयं चरुपिंडस्तुप० तस्योपरि तिलोद० अंजनादि विसर्जनांतं पूर्ववत् इत्य
ग्नावेकोद्दिष्टविधिसमाप्तं अथ वृषोत्सर्गः स्नात्वाचम्य देशकालौ संकीर्त्य अत्र कारिका एकादशे
न्हि प्रेतस्य यस्य नोत्सृज्यते वृषः प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि अत्र नाचार्यवरणं काम्य

उप० 23

वृषोत्सर्गवत् किंतु स्वयमेव सर्वं कुर्यात् देशकालौ स्मृत्वा अमुकगोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं
उत्तमलोकप्राप्त्यर्थं वृषोत्सर्गं करिष्ये इति संकल्प्य तदंगं स्थंडिलं चतुरस्रं गोमयेन लिप्य उल्लेखनं
अग्निप्रतिष्ठापनं भूर्भुवस्स्वरोमित्यग्निं प्रतिष्ठाप्य शुष्टोदमनां एह्यग्नेति० प्रोक्षितेंधनानि निक्षिप्य।
वेणुधमन्या प्रबोध्य ध्यायेद्देवं त्वत्वारिशृंगा इति ध्यानं ततोन्वाधानं अस्मिन्नन्वाहितेग्नावित्यादि आ
ज्यभागांतमुक्त्वा अत्र प्रधानं रुद्रं चरुणा सोमं पायसेन इंद्रं यावकेन शेषेण स्विष्टकृतमित्यादि
सद्योयक्ष्ये व्याहृतीः ३ नां परमेष्ठी० ॐ भूर्भुवस्स्वः स्वाहा प्रजापतय इदं० इध्माबर्हिषोश्च सन्नहनं परि
सम्हननं त्रिः ३ परिस्तरणं चतुः ४ पर्युक्षणं त्रिः ३ दक्षिणतो ब्रह्मासनं उत्तरतश्च पात्रासा धानं
दर्भं० चरुस्थाली त्रयं ३ प्रोक्षण्युपु दर्वीस्रुवौ प्रणीता आज्यपात्रे इध्माबर्हिः शूर्पं कृष्णाजिनं उलूख
लमुसलं चेति प्रोक्षणीयपात्रमुत्तानं० तत्रांतरगर्भी तसाग्रसमस्थल प्रादेशमात्र कुशद्वयरूपे प
वित्रे निधाय अद्भिः पूरयित्वा गंधपुष्पाक्षतानि० आ पवित्रं कृत्वा पात्राण्युत्तानानि कृत्वा इध्मं च विस्र

स्यासर्वाणि पात्राणि त्रिः ३ प्रोक्षयेत् तआपः केचित्कमंडलुं निक्षिपेत् ते पवित्रे प्रणितापात्रे नि० अन्येद
र्भैरा० प्रणितापामग्नेः प्रत्यग्निधाय अद्भिः पू० गंधपुष्पाक्षत० मुखमस्तु० बृहस्पतिर्ब्रह्मा० ॐ प्रणा
य० अग्नेरुत्तरतस्थापयेत् ते पवित्रे श्रूर्पे नि० अन्येदर्भैरा० श्रूर्पे हस्ताजिनमग्नेः प्रत्यग्दे शे नि० तूष्णीं
चतुरश्चतुरेस्मुष्टीन्निर्वापयेत् चरुंपायसं यावकेनेति तूष्णीं तद्द्रत्प्रोक्ष्य ते पवित्रे आज्यपात्रे निधा
या उलूखलमुसलेनेति कं डणपेषणादि त्रयंत्रयं वा हविस्त्रयं संपाद्य आज्यपात्रमग्नेः प्रत्यं तस्मि
न्नाज्यमासिच्यमग्नेरुत्तरतस्थितांगारांभस्म उल्मुकं ग्निरस्यापउप० सवितुं द्धृत्य स्यउत्सवनं प
वित्रे प्रोक्ष्यमग्नो प्रहरेत् विश्वानिन इत्यर्चेनं अलंकरणादि इध्माधाना घाघारांते चक्षुषीजुहुयात्
तत्र प्रधानं कद्रुद्रायप्रेस्क एवारुद्रोगायत्री रुद्रश्चरुहोमे विनियोगः ॐ कद्रुद्रायप्रचेतसेमीढुष्ट
मायतव्यसे वोचेमशंतमंहृदे स्वाहा रुद्रायेदं० सोमोधेनुमितिगोतमः सोमः सोमउष्णिक् सोम
पायसहोमे वि० ॐ सोमोधेनुंसोमाअर्वंतमाशुंसोमोवीरंकर्मण्यंददाति सादन्यंविदथ्यंसभेयंपित्

पुषा०

श्रवणं ददाशद्दस्मै स्वाहा सोमायेदं० इंद्रं वो मधुच्छंदा इंद्रो गायत्री इंद्रयावकहोमे वि० ॐ इंद्रं वो विश्वतस्य
रि हवामहे जनेभ्यः अस्माकमस्तु केवलः स्वाहा इंद्रायेदं० ततः स्विष्टकृतं यदस्यदि स्विष्टकृतं हुत्वा
रज्जुं प्रहरेत् पूर्णपात्रं विमोकांतं मार्जनादि कुर्यात् केचिदिंद्राय स्वाहेत्यादिना मम मंत्रैरेव होममाहुः
ततो द्विहायनं एकहायनं वा जीववत्सायाः पयस्विन्याः पुत्रं नीलादिवर्णं लोहितो यस्तु वर्णेन मुखे
पुच्छे च पांडुरः श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते इति लक्षितं यथालाभं वा आनीय ततः
श्चतस्रो एकां वा एकवर्षाधिकां वत्सतरीमानीय गोसहितं वृषभस्य मंत्रैरभिषेकः कार्यः आपोहिष्ठेति
तिसृणां सिंधुद्वीप आपो गायत्री वत्सतर्यभिषेके वि० ॐ आपोहिष्ठाम० यो वः शिव० तस्मा अ
रं ग० कया न इति तिसृणां गोतमो वामदेव इंद्रो गायत्री अभिषुण इति पादनिचृत् वत्सतर्यभि
षेके वि० ॐ कया नश्चित्र आभुवदूती सदावृधः सखा कया सचिष्ठया वृता कस्त्वा सत्यो मदानां मं
हिष्ठो मत्सदंधसः दृढाचिदारुजे वसु अभीषुणः सखीनामविता जरितॄणां शतं भवास्यू

त्रिभिः इत्यभिषेकं वृषं वत्सतरीकं वस्त्रगंधाक्षतमाल्यादि यथाशक्त्यालंकृतं ० अथोपस्थानं ऋषभमिति सूक्त
स्य ऋषभ ऋषभो विराट् अंत्या महापंक्तिः ऋषभोपस्थाने विनियोगः ॐ ऋषभं मा समानानां सपत्नानां वि
षासहिं हंतारं शत्रूणां कृधि विराजं गोपतिं गवां अहमस्मि सपत्नहेंद्र इवारिष्टो अक्षतः अधः सपत्ना मे प
दोरिमे सर्वे अभिष्ठिताः अत्रैव वोपि नह्याम्युभे आर्त्नी इव ज्यया वाचस्पते निषेध मान्यथा मदधरं वदान्
अभिभूरहमागमं विश्वकर्मेण धाम्ना अ वश्चित्तमा वो व्रतमा वोहं समितिं ददे योगक्षेमं व आदायाहं भूयास
मुत्तम आ वो मूर्द्धानमक्रमीं अधस्पदान्म उद्वदत मंडूका इवोदकान्मंडूका उदकादिव इति कृतांजलिपुटो जपे
त् ततो वृषं प्रदक्षिणमग्निं पूर्वेण आनीय अस्य दक्षिणबाहुस्फिगधि भस्मना त्रिशूलाकारं अंकं कृत्वा ॥
वामे चक्रेण कृत्वा ० तदुपरि तप्तलोहेनांकं कारयेत् ततः प्राच्यामुत्सृजेत् व्रजंतमनुमंत्रयिता ॐ एतं युवानं
पतिं वो ददामि तेन क्रीलंतिश्चरत प्रियेण मा वेशाप्त जनुषा सुभगा रायस्पोषेण समिषा मदेम शांताद
थिवी शिवमंतरिक्षं द्यौस्ते देव्यभयं कृणोतु शिवा दिशः प्रदिश उद्दिशो न आपो विश्वतः परिपांतु विसर्वतः

शंतिः शंतिः सर्वेतोव्रजस्वेतिब्रूयात् ऋषभोपस्थानमेतदनंतरं वा ततोवृषं पूर्वाभिमुखं स्थापयित्वा रुद्रसू
क्तं जपेत् कद्रुद्रानवर्चस्य सूक्तस्य घोरः कण्वा रुद्रा गायत्री पूर्वोदिक उपस्थाने विं० ॐ कद्रुद्राय प्रचेतसे मीढु
ष्टमाय तव्यसे वोचेम शंतमं हृदे यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे यथा तोकाय रुद्रियं यथा नो मि
त्रो वरुणो यथा रुद्रश्चिकेतति यथा विश्वे सजोषसः गाथपतिं मेधपतिं रुद्रं जलाषभेषजं तच्छंयोः सुम्नमीम
हे यः शुक्र इव सूर्यो हिरण्यमिव रोचते श्रेष्ठो देवानां वसुः १ शन्नः करत्यर्वते सुगं मेषाय मेष्ये नृभ्यो नारि
भ्यो गवे अस्मे सोम श्रियमधि नि धेहि शतस्य नृणां महि श्रवस्तुविनृम्णं। मा नः सोमपरिबाधो मारातयो
जुहुरंत आ न इंदो वाजे भज यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य मूर्धा नाभा सोम वेन आभूषंतीः
सोम वेदः २ एतत्सूक्तस्य जपांते गोभिः सह तृणं भक्ष जलं पिब यथासुखं क्रीडस्वेति वदेत् ततो दक्षिण
स्यां दक्षिणाभिमुखमानयेत् रुद्रसूक्तं जपेत् इमा रुद्रायेति सूक्तस्य कुत्सो रुद्रा जगती अंत्ये त्रिष्टुभौ द
क्षिणादिगुपस्थाने विनि० ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः यथा शमसद्द्विपदे च

तुष्यदेविश्वंपुष्टंग्रामेअस्मिन्ननातुरं मृलानोरुद्रोतनोमयस्कृधिक्षयद्वीरायनमसाविधेमते यच्छंचयोश्च
मनुरायेजेपितातदश्यामतवरुद्रप्रणीतिषु अश्यामतेसुमतिंदेवयज्ययाक्षयद्वीरस्यतवरुद्रमीढ्वः सुम्ना
यन्निद्विशोअस्माकमाचरारिष्टवीराजुहवामतेहविः त्वेषंवयंरुद्रंयज्ञसाधंवंकुंकविमवसेनिह्वयामहे।
आरेअस्मद्दैव्यंहेलोअस्यतुसुमतिमिद्वयमस्यावृणीमहे दिवोवराहमरुषंकपर्दिनंत्वेषंरूपंनमसानिह्व
यामहे हस्तेबिभ्रद्भेषजावार्याणि शर्मवर्मछर्दिरस्मभ्यंयंसत् १ इदंपवित्रेमरुतामुच्यतेवचस्स्वादोस्स्वा
दीयोरुद्रायवर्धनं रास्वाचनोअमृतमर्त्तभोजनंत्मनेतोकायतनयामृल मानोमहान्तमुतमानोअर्भकं
मानउक्षंतमुतमानउक्षितं मानोवधीःपितरंमोतमातरंमानःप्रियास्तन्वोरुद्ररीरिषः मानस्तोकेत
नयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः वीरान्मानोरुद्रभामितोवधिर्हविष्मंतःसदमित्वाहवा
महे उपतेस्तोमान्पशुपाइवाकरंरास्वापितर्मरुतांसुम्नमस्मे भद्राहितेसुमतिर्मृळयत्तमाथावयमव
इत्तेवृणीमहे आरेतेगोघ्नमुतपूरुषघ्नंक्षयद्वीरसुम्नमस्मेतेअस्तु मृलाचनोअधीचब्रूहिदेवाधाच

26

उ५०

नः शर्मयच्छन्द्विबर्हाः अरुवो चामनमो अस्मा अवस्यव श्रणोतु नो हवं रुद्रो मरुत्वान् तन्नो मित्रो वरुणो मा
महंतामदितिः सिंधुः पृथिवी उत द्यौः एतत्सूक्तं जपांते गोभिः सहतुरंगं भस्मजलेपि वयथा सुखं क्रीडंस्ये
त्तिब्रूयात् ततः पश्चिमस्यां पश्चिमाभिमुखं गत्वा रुद्रसूक्तं जपेत् आ ते पितरिति सूक्तस्य गृत्समदो रुद्रस्त्रि
ष्टुप् पश्चिमादिग्गुपस्थाने विः ॐ आ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः अभि नो वीरो
अर्वति क्षमेत प्रजायेमहि रुद्र प्रजाभिः त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः व्य१स्मद्द्वे
षो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो पर्षि
णः पारमंहसः स्वस्ति विश्वा अभितीरिपवसा युयोधि मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ
मा सहूती उन्नो वीरां अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि हवीमभिर्हवते यो हविर्भिरव स्तो
मेभी रुद्रं दिषीय ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै १ उन्मा ममंद वृषभो मरुत्वां
त्वक्षीयसा वयसा नाधमानं घृणीव च्छायामरपा अशीया विवासेयं रुद्रस्य सुम्नं क१स्य ते रुद्र मृळ

याकुहस्तायोअस्तिभेषजोजल्लाषः अपिभर्त्तारपसोदैव्यस्याभीनुमावृषभचक्षमीथः प्रबभ्रवेवृषभायश्वि
तीचेमहोमहींसुष्टुतिमीरयामिनमस्याकल्मलीकिंनमोभिर्गृणीमसित्वेषंरुद्रस्यनाम स्थिरेभिरंगैःपु
रुरूपउग्रोबभ्रुःशुक्रेभिःपिपिशेहिरण्यैः ईशानादस्यभुवनस्यभूरेर्नेवाउयोषद्रुद्राद्सुर्यं अर्हन्बिभ
र्षिसायकानिधन्वार्हन्निष्कंयजतंविश्वरूपं अर्हन्निदंदयसे विश्वमभ्वंनवाओजीयोरुद्रत्वदस्ति २
स्तुहिश्रुतंगर्तसदंयुवानंमृगन्नभीममुपहत्नुमुग्रं मृळाजरित्रेरुद्रस्तवानोन्यंते अस्मन्निवपंतुसे
ना कुमारश्चित्पितरंवंदमानंप्रतिनानामरुद्रोपयंतं भूरेर्दातारंसत्पतिंगृणीषेस्तुतस्त्वंभेषजारास्य
स्मे यावोभेषजामरुतःशुचीनियाशंतमावृषणोयामयोभु यानिमनुरवृणीतापितानस्ताशंचयोश्चरु
द्रस्यवश्मि परिणोहेतीरुद्रस्यवृज्याः परित्वेषस्यदुर्मतिर्महीगात् अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तो
कायतनयायमृळा एवाबभ्रोवृषभचेकितानयथादेवनहृणीषेनहंसि हवनश्रुन्नोरुद्रेहबोधिबृह

उ पा० हृदेमविदथेसुवीराः ३ एतत्सूक्तजपांतेगोभिः सहतृणंभक्ष्यजलंपिब यथासुखंविहरेत ततः उत्तरस्या
उदस्तुखंकृत्वा सूक्तंजपेत् इमारुद्रायेतिवसिष्ठोरुद्रोजगती अंत्यास्त्रिष्टुप् उत्तरादिगुपस्थाने वि० ॐ
२१ इमारुद्रायस्थिरधन्वनेगिरः क्षिप्रेषवेदेवायस्वधान्ने अषाळ्हायसहमानायवेधसेतिग्मायुधायभर
ताश्रृणोतुनः सहिक्षयेनक्षम्यस्यजन्मनः साम्राज्येनदिव्यस्यचेतति अवन्नवंतीरुपनोदुरश्चरानमी
वोरुद्रजासुनोभव यातेदिद्युदवसृष्टादिवस्परिक्ष्मयाचरतिपरिसावृणक्तुनः सहस्रंतेस्वपिवातभे
षजामानस्तोकेषुतनयेषुरीरिषः मानोवधीरुद्रमापरादामातेभूमप्रसितौहीळितस्य आनोभजब
र्हिषिजीवशंसेयूयंपातस्वस्तिभिःसदानः १ एततसूक्तजपांतेगोभिःसहतृणंभक्ष्ययथासुखंविहरे
त ततः पुष्ठेप्रेतस्यनामगोत्राद्युच्चार्यतर्पणंकुर्यात् इतिकेचित् एतावत्कृत्वा ततोरुद्रसोमेंद्रेभ्योआ
मान्नत्रयंसदक्षिणंदध्यात् ततोवृषोत्सर्गसंपूर्णतासिध्यर्थंतिलानुदकुंभंगावासोहिरण्यंयथाशक्ति
सदक्षिणंदद्यात् पतिपुत्रवत्यासुवासिन्याः नेवृषोत्सर्गंकुर्यात् वृषोत्सर्गस्थानेएकापयस्विनी

गोर्दद्यात् यस्यस्मृत्येतिसंपूर्णं इतिवृषोत्सर्गविधिः समाप्तः तथेत्यादिनवश्राद्धमेकोद्दिष्टंपिंडप्रवाहनस्नानां
तंप्राप्युक्तविषमादिनवकुर्यात् शिवस्याभिमतेनैतत् पंचैवनवश्राद्धानिपूर्वोक्तानितन्मते॥ इति॥ ॥छ॥
अथरुद्रगणश्राद्धं तच्चैकादशेरुद्रोद्देशेनरुद्ररूपं प्रेतोद्देशेनप्रेतरूपेणवाकार्यं रुद्रोद्देशपक्षेसव्यं प्रेतोद्दे
शपक्षेअपसव्यं दर्भमयब्राह्मणांन्निमंत्र्य देशकालौस्मृत्वाप्राचीनावीतिगोत्रस्यामुकशर्मणः प्रेतस्यप्रे
वि तत्वमुक्त्यर्थं० एकादशेहनिविहितंरुद्रगणश्राद्धंकरिष्ये क्षणपाद्य अर्घ्यआधासनादिपूर्ववत्० ततः
गोत्रस्या० इदंपरिविष्टसक्तुआमंप्रेतायस्वुपतिष्ठतु ततः गोत्रस्या० रुद्रगणश्राद्धे पिंडप्रदानंकरिष्ये॥
पिंडस्याधः दर्भासनमस्तु० गोत्रस्यामुकशर्मणःप्रेतस्य० रुद्रगणश्राद्धे अजैकपादरूपिणेप्रेतायअयं
सक्तुपिंड० एवंसर्वत्र अहिर्बुध्न्यरूपिणेप्रेताय० २ पिनाकिरूपिणेप्रेताय० ३ अपराजितरूपिणेप्रेताय०
४भुवनाधिश्वररूपिणेप्रेताय० ५ कपालिरूपिणेप्रेताय० ६ विशांपतिरूपिणेप्रेताय० ७ स्थाणुरूपि
णेप्रेताय० ८ भगरूपिणेप्रेताय० ९ भगवानरूपिणेप्रेताय० १० रुद्ररूपिणेप्रेताय० ११ तस्योपरि

उप०

तिलोदकादिविसर्जनांतंपूर्ववत् इतिरुद्रगणश्राद्धं इदंचकृत्वाकृतं इदमप्युद्दिष्टस्य देशपक्षेसव्यं।आमा
न्नेनवाकुर्यात् संकल्पादिपूर्ववत् दर्भमयब्राह्मणंकृत्वा क्षणपाद्यअर्घ्यअर्चनआच्छादनांतंपूर्ववत्
अग्नौकरणंकृत्वाकृतं इदंसोपस्कर आमंकव्यंपरिवेष्य० प्रेतायमुं० गोत्रायामुं० अष्टौवस० पिंडप्रदा
नंकरि० दर्भासनमु० गोत्रस्यामुकशर्मणः प्रे० एकादशाहनिविहितंअष्टौवसवश्राद्धेध्रुवरूपिणेप्रे
तायअयंसक्तुपिंडस्तु० १ एवंसर्वत्र अध्वररूपिणेप्रेताय० २ सोमरूपिणेप्रेताय० ३ आपरूपिणे
प्रेताय० ४ नलरूपिणेप्रेताय० ५ अनिलरूपिणेप्रेतायअयंसक्तुपिंडमुपतिष्ठतु ६ प्रत्यूषरूपिणे
प्रेताय० ७ प्रभासरूपिणेप्रेताय० ८ तस्योपरितिलोदकादिपूर्ववत् विसर्जनांतंपूर्ववत् इतिअ
ष्टौवसवश्राद्धं इत्येकादशाहकृत्यं अथआद्यमासिकादिषोडशश्राद्धानिकुर्यात् तानिच देशकालौ
संकीर्त्यप्राचीनावीतिगोत्रस्यामुकशर्मणः प्रेतस्यप्रेतत्वविमुक्त्यर्थंउत्तमलोकप्राप्त्यर्थं आद्यमा
मासिकमित्यादिऊनाब्दिकांतंएतानि आद्यमासिकं० १ ऊनमासिकं० २ द्वितीयमासिकं० ३ त्रिपाक्षिकं० ४

तृतीयमासिकं० ५ चतुर्थमासिकं० ६ पंचममासिकं० ६ षण्मासिकं ८ ऊनषण्मासि ९ सप्तममासि
कं १० अष्टममासिकं ११ नवममासिकं १२ दशमासिकं० १३ एकादशमासिकं १४ द्वादशमासिकं १५ ऊ
नाब्दिकानि १६ एतानिषोडशश्राद्धानि स्वस्वकाले कर्त्तव्यानि द्वादशाहे सपिंडीकरणाधिकारार्थं
अपकृष्यैकादशे द्वादशेन्हि आमान्नद्वारा एकोद्दिष्टविधिना तंत्रेण करिष्ये इति संकल्प्य यदि मरणा
दारभ्य द्वादशमासमध्ये कश्चिदधिकः स्यात्तदा तन्मासिकं द्विवारं कार्यं एवं सप्तदशश्राद्धानि भवंति
ततः गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं आद्यमासिकादि षोडशमा
सिकश्राद्धे क्षणमुपतिष्ठतु दर्भमयब्राह्मणानीमंत्र्य पाद्यासनार्घ्यानि दद्यात् गोत्र० अग्नौकरणमु०
गोत्राय प्रेताय आद्यमासिकादि षोडशश्राद्धे इदमन्नं यथाशक्ति सोपस्करं प्रेताय उपतिष्ठतु पिंडप्रदानं
करिष्ये पिंडस्याधः दर्भासनं० तस्योपरि तिलमुपतिष्ठ० गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वनिवृत्त
र्थं उत्तमलोकप्राप्त्यर्थं मरणादिदारभ्य एकादशेहनि विहितं आद्यमासिकश्राद्धे अयं सक्तुपिंडमुपति०

उ५०

५९

एवमेव ऊनाद्यिकान्तं ऊनमा० २ द्वितीय० ३ त्रैपक्षी ४ तृतीय० ५ चतुः ६ पंचम० ७ षष्ठं ८ ऊनषट्० ९ सप्त १० अ
ष्ट ११ नव १२ दश १३ एकादश १४ द्वादश १५ ऊनाब्द १६ अयं च सक्तुपिंडमुपति० पिंडस्योपरि तिलोदकादि
पूर्ववत् द्विसर्जनान्तं कृत्वा आमान्नपक्षे आमान्नसंकल्पं कृत्वा आमान्नं द्विगुणं प्रोक्तं यथाशक्ति दक्षिणां
दद्यात् ततः स्नायात् एतत्कर्मसांगतासिध्यर्थं ब्राह्मणेभ्यो भूयसीं दत्वा इति आद्यादिषोडशश्राद्धं समा
प्तं॥ ॥छ॥ ॥अथ सपिंडीकरणं दर्भमय षट् ब्राह्मणान् निमंत्र्य हविष्यं पाचयित्वा॥ ॥तत्रानेककालत्वपि
कल्पो द्वादशाहे कर्तव्यं अनित्यत्वाच्छरीरस्य पूर्वेद्युः वैश्वदेवार्थं द्वौ विप्रौ प्रेतस्य पित्रादेर्येः सहसपिंडीकर
णं तत्र पार्थे त्रिनेकं च प्रेतार्थं एवं षट् ब्राह्मणान्निमंत्रयेत् अत्यशक्तौ देवत्रयं प्रेते चैकैकमिति त्रीन् नि
मंत्रणादि कर्तुः स्तेषां च ब्रह्मचर्यं अपरेद्युर्ब्राह्मणानां श्मश्रुकर्माभ्यंगादि कारयित्वा अत्र प्रयोगः कर्ता तु
कृतमाध्यान्हिकादि पवित्रपाणिः देशकालौ संकीर्त्य प्राचीनावीति गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्व
विमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं प्रेतलोकात् पितृलोकप्राप्त्यर्थं द्वादशाहे सपिंडीकरणश्राद्धं कर्तुमहं तांहान

स्य अस्मत् पितृपितामहप्रपितामहैः अमुकशर्मभिः वसुरुद्रादित्यस्वरूपैः मृताहाद्द्वादशाहे सपिंडीकश्रा
द्धं पार्वणैकोद्दिष्टविधानेन सहिकतंत्रेण करिष्ये इति संकल्प्य अत्र मातुः सपिंडीकरणे मम मातुः गो
त्रायामुकशर्मणा दास्याः प्रेतायाः अस्मत्पितामहि प्रपितामहि वृद्धप्रपितामहिभिः अमुकशर्मभिः व
सुरुद्रादित्यस्वरूपाभिः मृताहाद्द्वादशाहे सपिंडिकरणश्राद्धं पार्वणैकोद्दिष्टविधानेन सहैकतंत्रेण
करिष्ये इति संकल्प्य एवं भ्रात्रादिवा पितृव्यादिवा अन्ये सगोत्रिणः प्रेतस्य पितृपिताप्रपितामहे
न सपिंडने पिंडेयं ततोपसव्येन तिलोदकममंत्रं कुर्यात् अतः सव्येन तिलोदकेन महं करिष्ये इमं मे गं
गेति मितामितेति उदकं पूरयित्वा ॥ सरासः कुशरासो इति कुर्वंति त्वो मिति तिलं क्षि त्वा रणेय तत्पुरये
त् ततमहोनमिति नवकं च स्यसूक्तं जपेत् ॥ शुचिर्वेति मार्जनं कृत्वा प्रदक्षिणं कृत्य ततः सव्येन काम
कालसंज्ञका विश्वेदेवाः स्थाने क्षणं दत्वा भवद्भिः क्षणः प्रसादः कर्त्तव्यः इति द्वौ देवो प्राचीनावीति
गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्ववि० मरणादिनादारभ्य द्वादशाहे सपिंडीकरणश्राद्धे क्षणमु०

उप०

30

अपउपस्थस्य अस्मत्पितामह अमुकशर्मन् अमुकगोत्र वसुरूपस्थानेक्षणं दत्वा एवं प्रपितामहः०
एवं वृद्धप्रपितामः० ततः मंडलत्रयं कुर्यात् उत्तरे विश्वेदेवामंडलं चतुः कोणं तद्दक्षिणे प्रेतमंडलं त्रि
कोणं तद्दक्षिणे पितरमंडलं वर्त्तुलं ततस्तिपार्वेणवत् ततः मध्यममंडले प्राचीनावीति अमुकगोत्र
अमुकशर्मन् प्रेत इदं पाद्यमुपतिष्ठतु हस्तं प्रक्षाल्य ततः दक्षिणमंडले पार्वेणवत् अमुकगोत्रामुक
शर्मेणः एतत्पितरित्यादिक्रमेण त्रिभ्यः पाद्यं दद्यात् ततः कर्त्तोपवित्रं विस्तरस्य पादौ प्रक्षाल्य द्विरा
चम्यापक्रांतं सपिंडीकरणश्राद्धं करिष्ये इति संकल्प्य अत्रैव पूर्वोक्त सकल संकल्पः कार्यः अपह
तासुरारक्षांसीत्यामुक्त्वा सव्येन कामकालसंज्ञकानां विश्वेषां देवानामिदमासनंमिति प्राङ्मुख
ब्राह्मणद्व्यासनं दत्वा आस्यतामित्यादि पार्वेणवारुजां कृत्वा युष्मदनुज्ञेया प्रेततत्पित्राद्यर्चनं करि
ष्ये इति संकल्प्य अपसव्यं अमुकगोत्रस्यामुकशर्मणः प्रेतस्य आसनमुपतिष्ठतु अमुकगोत्रा
येत्यादि तत्पितृ तत्पितामहे तत्प्रपितामहायेत्यादिक्रमेण प्रेतपूर्वभागे उदङ्मुखेभ्यः स्त्रिभ्यः आ

सनं दद्यात् त्रिभ्यः सपिंडीकरणश्राद्धे क्षणः क्रियतां ॐ तथा प्रा० अत्रः ततः प्रेतस्य उदङ्मुखं ति
लदर्भान्विकीर्य अर्घ्यार्थमेकपर्णेन पात्रमासाद्य चतुःकुशाकूर्चं निधायापः पूर्णं कृत्वा गंधपुष्पति
लान्क्षिप्त्वा तिलोसि सो० प्रत्नवद्भिः प्रत्नः स्वधया प्रेतमिमान् लोकान्प्रीणयाहि नः स्वधा नमः
इति मंत्रान्पठेत् सर्वेष्वमंत्रकं कृत्वा ततः तद्दक्षिणे पितरोद्देशे त्रीन् अर्घ्यानासाद्य पात्रत्रयं
निधायाभ्युक्ष्याउध्र्त्या त्रीन् त्रीन् दर्भान्कूर्चत्रयं निधायाशन्नोदेवीति अद्भिः पूरयित्वा गंधपुष्पा
णि क्षिप्त्वा तिलोसीति मंत्रेण तिलान् क्षिप्त्वा सर्वत्र पितृपात्राणि सपन्नानि स्पृष्ट्वा स्वधार्घ्यो स्त्विति नि
वेदयेत् ततः प्रेतपात्रस्थमेकं पवित्रं प्रेतस्थानीयब्राह्मणहस्ते दत्वा तस्पात्रस्थमुदकं किंचिद्गृहीत्वा
मुकगोत्रामुकमुकशर्मन् प्रेत इदं अर्घ्यं सुपतिष्ठतु भि इति अर्घ्यं दत्वा ततः गोत्रस्यामुकशर्मणः प्रे
तस्य प्रेतत्वनिवृत्त्यर्थं उत्तमलोकप्राप्त्यर्थं मरणदिनादारभ्य द्वादशाहे सपिंडीकरणश्राद्धे अस्मत्
पितामह अमुकगोत्र अमुकशर्मन् वसुरूप एतत्प्रतार्घ्यपात्रोदकं पितामहार्घ्यपात्रोदकेन सह सं

उर्ध्व० योजयिष्यसहसंयोज्यतत्रमंत्रास्तु येसमानाःसमनसःपितरोयमराज्ये तेषांलोकस्वधानमोयज्ञो
31 यज्ञेषुकल्पतां येसजाताःसमनसोजीवाजीवेषुमामकाः तेषांश्रीर्मयिकल्पतामस्मिंलोकेशतंहि
माः संगछध्वंसंवदध्वंसंवोमनांसिजानतां देवाभागंयथापूर्वेसंजानानाउपासते समानोमंत्रः
समितिःसमानीसमानंमनःसहचित्तमेषां समानंमंत्रमभिमंत्रयेवःसमानेनवोहविषाजुहो
मि समानीवआकूतिःसमानाहृदयानिवः समानमस्तुवोमनोयथावःसुसहासति मधुवाता
ऋतायतेतितृचंपठेत् पितृपात्रेमधुउदकमिश्रीकुर्यात् एवंप्रपितामहार्घ्यपात्रेछहृ प्रपिता
महपात्रेपिकुर्यात् पितामहप्रपितामहरुद्रप्रपितामहसायुज्यंगछेत्युक्त्वा तदनंतरंपित्रादिपा
त्रोदकेनपार्वणवत्तेभ्योप्यर्घ्यंदत्वा प्रेतार्घ्यपात्रंमग्निंकुर्यात् हस्तंप्रक्षाल्य ततःप्रेतपूर्वकंपा
र्वणेनगंधाछादनादियथानुक्रमंसर्वेभ्योदद्यात् प्रेतस्थानेविशेषेणदत्तः ततःअग्नौकरण
ह्यंकार्यं भोजनान्नात्किंचिदन्नंसघृतंगृहीत्वाप्रेतपात्रोपरिदत्वामुकगोत्रस्यामुकशर्मणःप्रे

तायस्वाहाग्नौकरणमुपतिष्ठतु प्रेतस्थानाहुत्यन्नं वन्हौ प्रक्षिपेत् हस्तं प्रक्षाल्य ततः श्राद्धान्नमादा
य पार्वणवत् पित्र्यब्राह्मणहस्तेऽग्नौकरणं कृत्वा प्रेतस्थानेन वा पाणिहोमः पित्र्यहुतमन्नं परिविष्टान्ने
न भुंजीत यत्र पाणितले दत्तं यच्चान्न्यदुपकल्पितं एकीभावेन भोक्तव्यं पृथग्भावो न विद्यत इति व
चनात् ततोऽन्नं परिविष्य दैवे पृथिवी ते पात्रमित्यादि कामकालसंज्ञिकेभ्यो विश्वेभ्यो देवेभ्य इदमन्न
मित्यादि पार्वणवत् ततः प्राचीनावीती प्रेतपात्रे पृथिवी ते पात्रमित्यादि अत्रामुकगोत्रामुकशर्मा
प्रेताभिदमन्नं सोपस्करं सघृतं प्रेताय उपतिष्ठतु इति विशेषः पित्र्यादिस्थाने पृथिवी ते पात्रत्रये
ण पार्वणवत् भोजनांते उच्छिष्टपिंडो देयाः तदनंतरं पिंडदानं उच्छिष्टसमीपे प्रोक्ष्योल्लिख्यापहते
त्यभ्युक्ष्य दर्भैरवैस्तीर्य गोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वनिवृत्त्यर्थं उत्तमं० द्वादशाहे सपिंडीकर
णश्राद्धे अयं चरुपिंड उपतिष्ठतु तस्योपरि तिलोदकमु० हस्तं प्रक्षाल्य ततः दक्षिणपंक्तिरूपेण पार्वण
वत् पित्र्यादिभ्यः पिंडत्रयं दद्यात् यद्वा पर्वतः। त्रीन् पिंडान् पित्रादिभ्य इति ततः दर्भमय रज्जुं मधुनाश्लि

अन्तिष्टि०

स्यनशकलंहत्वामधुनापूर्य ततः दक्षिणहस्तेप्रेतपिंडप्रेतप्रथमशकलंवामहस्तेपितामहपिंडंगृही
त्वागोत्रस्यामुकशर्मणःप्रेतस्यप्रेतत्वनिवृत्त्यर्थंउत्तमलोकप्राप्त्यर्थंद्वादशाहेसपिंडीकरणंश्राद्धं ततः
अस्मत्पितामहअमुकशर्मन्अमुकगोत्रवसुरूपएतत्प्रेतस्यप्रथमपिंडशकलंपितामहपिंडेनस

32

हसंयोजयिष्येसहसंयोज्यतद्वौहस्तौपिंडंयेकीकृत्य तत्रमंत्रास्तु ॐ येसमानाःसमनसःपितरोय
मराज्ये तेषांलोकस्वधानमोयज्ञोयज्ञेषुकल्पतां येसजाताःसमनसोजीवाजीवेषुमामकाः तेषांश्री
र्मयिकल्पतामस्मिन्यज्ञेशतंहिमाः संगच्छध्वंसंवदध्वंसंवोमनांसिजानतां देवाभागंयथापूर्वेसंजा
नानाउपासते समानोमंत्रःसमितिःसमानीसमानंमनःसहचित्तमेषां समानंमंत्रमभिमंत्रये
वःसमानेनवोहविषाजुहोमि समानीवआकूतिःसमानाहृदयानिवः समानमस्तुवोमनोयथावः
सुसहासति मधुवाताइतित्र्चेनमधुभ्यांमिश्रीकुर्यात् पितामहसायुज्यंगच्छेदितिवदेत् एवमे
वप्रेतस्यद्वितीयपिंडशकलंपिंडेनसहसंयोज्य एवमेवप्रेतपिंडत्ततीयभागशकलंवृद्धप्रपितामह

पिंडेन संयोजयेत् दधिमधुभ्यां मिश्रीकुर्यात् एवं मात्रादिस्मापिंडयोः पितामह्यादिपिंडत्रये योजयेत्॥
प्रतिपिंडसंयोजने ये समाना इत्यादिनां सर्वमंत्राणां नावृत्तिः ततः प्रेतपिंडावयवत्रयेण संयोजि
तास्त्रीन् पिंडानिदानीं मृतमारभ्य पुरुषत्रयाय पार्वणवत् पुनरपि नामगोत्राद्युच्चार्य पिंडदानं कुर्या
दित्याहुः ततः अत्र पितरो मादयध्वमित्यादि सर्वं पार्वणवत् द्वादशाहांते धारितमुत्तरीयवस्त्रं पिं
डोपरि दद्यात् तच्चाचार्यो गृह्णीयात् अवयवपिंडान्नपाकस्थाली आचार्याय देया॥ कुलाचार्यसमी
पे नास्ति तद्दायेन तत्कर्मस्य यो आचार्यस्तं देया॥ ततः कर्त्तानुवदेत् एष वोनुगतः प्रेतः पितृभागमवाप्नु
यात् शुभं भवतु शेषाणां जायतां चिरजीविनः इति मंत्रं पठेत् ततो विकिरद्वयं दद्यात् ॥ शिवा आपः सं
त्वित्यादि पार्वणवत् प्रेतस्थानीय विप्राय तरेभ्यो द्विगुणदक्षिणां दत्वा वाजे वाजे इत्यादि अभिरम्यता
मिति विसर्जयेत् ॐ स्वस्तीति वा विसर्जनं आसामांतं अनुव्रज्य पिंडान् गंगादौ प्रक्षिप्य स्नात्वाच
म्या गृहमागत्य वैश्वदेवादि कृत्वा सपिंडीकरणश्राद्धशेषान्नमन्नं यथाचारमिष्टैः सह भुंजीत श्रा

उर्ध्व० द्धभोजनेपिसचेलस्नानंकुर्यात् अन्यश्राद्धभोक्तॄणांमिथः स्पृष्टौ तदन्नमन्त्यंजनाः भुक्त्वा गायत्र्यष्टश
तंजपेत् उच्छिष्टसिक्तेप्रक्षाल्यभुक्त्वाद्विशतंजपेत् उच्छिष्टभोजनेसहस्रंजपेत् एवंमातुःसपिंडीक
करणंपितामह्यादिभिःसह पत्न्यामृतमातृकेनमात्रादिभिःसह अमृतमातृकेनपितामह्यादिभिः
इतियादिसर्वंनिर्णयावसरेवक्ष्यामः अथद्वादशात्रयोदशेवाह्निप्रातः स्नात्वाप्राणानायम्यसंध्या
33 वंदनादिकर्मशेषंसमाप्यतिथ्यादिदेशकालौसंकीर्त्य गोत्रस्यामुकशर्मणः प्रेतलोकात्पितृलो
कगमनसिध्यर्थंअमुकगोत्राणामुकशर्मणाअस्मत्पितृपितामहप्रपितामहानांवसुरुद्रादित्यस्व
रूपाणांपाथेश्राद्धंसदैवंसपिंडंसाग्नौकरणंपार्वणेनविधिनासद्यः करिष्ये इतिसंकल्प्य सूत्रोक्त
विधिंकृत्वा पक्वान्नेनवाकुर्यात् यथाशक्तिब्राह्मणानभ्यसंदत्वा इतिद्वादशदिनकृत्यं॥ ॥इ
तिश्रीभट्टरामेश्वरसूरिसुतनारायणभट्टविरचितायांमौर्ध्वदेहिकादिसपिंडीकरणप्रयोगः समा
प्तः॥ ॥ततः त्रयोदशेह्निः कर्ताअभ्यंगस्नानंकृत्वा देशाचारेवृद्धाचारे केचित्पुंगीफलेषुगृहद्वार

मध्ये काष्ठेन सकृत् भग्नं नागवल्लित्रिदलैः तांबूलं भक्षयंति पश्चात् दूगंषं त्यक्त्वा पुनः स्नात्वा इति कृ
ताकृतं ततः सुहृद्ब्राह्मणैः सह सुमुखश्चेत्यादि देशकालौ स्मृत्वा मम समस्तपापक्षयार्थं सर्वेषां गोत्र
जानां युमारिष्टनिरसनार्थं शुभफलप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं गणेशपूजनपूर्वकं स्वस्तिवाच
नं करिष्ये यथाशास्त्रस्वस्त्ययनं वाचयित्वा आशिषो गृहीत्वा ऊर्ध्वं श्रीखंडधारणं तांबूलभक्षणादि
श्रा कुर्यात् ततः प्रातिर्ह्वानि कुर्यात् बंधुभिः सह भुंजीरन् इति त्रयोदशदिनकृत्यं अथोदकुंभश्राद्धं॥
तत्र याज्ञवल्क्यः अर्वाक्सपिंडीकरणं यस्य संवत्सराद्भवेत् तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्वि
जे गौतमः अदैवं पार्वणश्राद्धं सोदकुंभमधर्मकं कुर्यान्मन्यादिकं श्राद्धं संकल्पविधिनात्विह अधर्म
कं पुनर्भोजनादिनियमरहितं तथा चेदं कृताकृतं वा सपिंडेन त्रयोदशदिनादारभ्य यावद्वर्षं प्रतिदि
नं कार्यं अशक्तौ प्रतिमासे तत्राकृते सपिंडने कोद्दिष्टं कृते तु तस्मिन् यथा पार्वणमेकोद्दिष्टं वा मृता
ह श्राद्धं कुर्यात् तथैव मकुर्यादिति ततो वर्षांत्यदिने संवरविमोक्षश्राद्धं पार्वणविधिना शक्त्या भूरि

अं.ति.शि.
34

ब्राह्मणभोजनंकार्यं इतिउदकुंभश्राद्धं अथमातापित्रोपिमरणे प्रथमाब्देविहितनिषिद्धानि तत्रधव
लनिबंधेदेवलः प्रमातापितरौयस्यदेहस्तस्याशुचिर्भवेत् नदैवंनापिवापित्र्यंयावत्पूर्णोनिवत्स
रः तथामहागुरुनिपातेतुमेनकार्यंयथाविधिः कुर्यात्संवत्सरादवाक्एकोद्दिष्टंनपार्वणं अन्य
दीयमित्यर्थः स्नानंचैवमहादानंस्वाध्यायंचाग्नितर्पणं प्रथमेब्दे नकुर्वंतिमहागुरुनिपातिते॥
तथा सर्वेषांप्रेतकर्माणिमहागुरुनिपातिते कुर्यात्संवत्सरादर्वाक्ऊर्द्धमेकंतुवर्जयेत् मातावेव
तथाभ्राताभार्यापुत्रतथास्नुषा एषांमृतोचरेछ्राद्धंमन्येषान्नपुनःपितुः तथा माताचैवसुताभ्रा
तापत्नीचैवविपद्यते तत्रश्राद्धानिकुर्वीतनकुर्याज्जननेमृते अन्यच्च अस्तिक्षेपंगयाश्राद्धंश्राद्धं
चापरपक्षिकं प्रथमेब्देकुर्वीतरुतेपितृसपिंडने अस्यापवादः अस्तिक्षेपंगयाश्राद्धंश्राद्धंचाप
रपक्षिकं प्रथमेब्देपिकुर्वीतयदिस्यान्नभक्तिमान्सुतः भक्तिमान्भक्तयाख्यंश्राद्धंदेवतात्वयोग्य
तासंपादकंश्राद्धंवहान् तत्कृत्वाएतानिकुर्यादित्यर्थः अन्येतुयथाश्रुतंव्याचक्षते एतस्यचवि

श्रा

षयविवेकस्मिन्हते त्रिस्थलीसेतौ गयाप्रकरणे गंतव्यः इति श्रीभट्टरामेश्वरसूरिसुतनारायणभट्टकृ
तायां मौर्ध्वदैहिकपद्धतिः समाप्तं॥ ॥छ॥ ॥अथ पलाशप्रतिकृतिदाहविधिः तत्र देशांतरमरणे परा
कद्वयमष्टौ कृष्ट्वान् वा स्वल्पास्थीनि दहेत् यद्यस्थीनि चंडालाश्वादिभिः स्पृष्टानि स्युः तदा पंचगव्यगं
गोदकाभ्यां प्रक्षाल्य विधिना दहेत् अथवास्थालीन्यपि न लभ्यंते तस्य पर्णशरदाहः तस्य प्रकारः।।
अथ पुनःसंस्कारे कालशुद्धिः आशौचमध्ये पुनःसंस्कारे यथासंभवं दिनं शोध्यं कालांतरे तु शोध्यमेवं
संवत्सरादूर्ध्वं प्रेतकार्ये उत्तरायणः श्रेयात् तत्रापि शुक्लपक्षः तिथिषु त्रयोदशी चतुर्दशी दिन
क्षयं च वर्जयेत् शुक्रशनिवासरौ वर्ज्यौ नक्षत्रेषु भरणीकृत्तिकार्द्राश्लेषामघाधनिष्ठादिनपंचकं त्रि
पुष्कराणि चातिदुष्टानि वर्ज्यानि व्यतिपाते परिघे वैधृतौ च योगे विष्टिकरणे तु चतुर्थाष्टमद्वादशस्थे चं
द्रे चातिदोषः रोहिणीमृगशीर्षपुनर्वसूपूर्वोत्तराचित्राविशाखानुराधापूर्वाषाढोत्तराषाढानि द्विपु
ष्कराणि चैव दुष्टानि संभवे वर्ज्यानि शिष्टान्यशिष्टानि सर्वथा दिनशोध्यसंभवे नातिदुष्टबाह्यनक्षत्रे

अंतिष्टि॰

ग्राह्यं नपुनः आंतरं ग्राह्यं नंदायाभुक्ते चतुर्दश्यां जन्मनक्षत्रेषु एकोद्दिष्टमिति निषिद्धं एकादशाहादेर्नति
शोधः नत्रतिथ्यादि नैव शोध्यं युगादिमन्वादिसंक्रांत्यमावास्यासु प्रेत कार्यं पुनः संस्कारे चाकिंचिदपि
35 नशोध्यं अथाधिकारिणः सर्वत्र दाहपिंडादि अपतितादिर्ज्येष्ठ औरसः पुत्रः कुर्यात् तदसन्निधौ
कनिष्टः तेषां सर्वेषां असंन्निधौ पौत्रो ज्येष्ठपुत्रादि क्रमेण तदभावे तथैव प्रपौत्रः एषामभावे पुत्रिका
पुत्रादयः पुत्रा क्रमेण तदभावे तत्पुत्रादयः पूर्ववत् उक्ताभावे पत्नी एवं पुत्राद्यभावे पुत्र्याभर्त्ता तद
भावे सपत्नी पत्न्यभावे भ्रातुपौत्रो भ्राता तास्नुषा दुहिता दौहित्रः अन्यः सगोत्रः सपिंडः सब्रह्मचा
रि मित्र शिष्या गुरु बांधवा धनसंबंधी वा दद्यात् नपुत्रस्य पिता दद्यात् नानुजस्य तथाग्रजः यदि
स्नेहेन कुर्वीत सपिंडीकरणं विनाद्वादंसति संभवेत् अदत्तकन्या पितरो दत्तः अन्याभावे दत्तानाम्
पिता वै दौहित्रमातामहौ परस्परं मातामह्याश्च दौहित्रो जामातृश्वशुरौ मिथः श्वश्वा स्नुषा भ्रातरो
च मिथो दत्तः गुरुशिष्यौ परस्परं इति अथ पलाशप्रकृतिप्रयोगः नदीतीरं गत्वा सुस्थलं कल्पयेत्

शुचिर्भूमौ कृष्णमृगचर्ममास्तीर्य तदुपरि कुशरं दक्षिणाग्रनायतं निवेश्य तदुपरि पलाशवृन्तानि न्य
सेत् शिरसि चत्वारिंशत् ४० ग्रीवायां दश १० बाह्वोः प्रत्येकं पंचाशत् १०० करांगुलीषु सर्वासु दश
१० उरसो विंशत् २० जठरे त्रिंशत् ३० शिश्ने चत्वारि ४ अंडयोस्त्रयं त्रयं ६ ऊर्वोः प्रत्येकं पंचाशत्
१०० जंघांतपादयोः प्रत्येकं पंचदश ३० सर्वासु पादांगुलीषु दश १० एवं षष्ट्यधिकशतत्रयमितैः
३६० पर्णशरैः शरीरं निर्माय ऊर्णासूत्रेण शरेण सह बध्वा जललोहित यवपिष्टेनानुलिंपेत् ततः श
क्रोमस्तां वक्ष्यमाणापिकायां शिरो ऊर्ध्वस्थाने कदलीफलं शिरसि नारिकेलं वा वर्तुलं तुंबं ललाटे
कदलीपत्रं दंतेषु दाडिमीबीजानि करणेकं कर्णं वा शिंपी नेत्रयोः कपर्दकौ नासिकायां तिलपुष्पं स्त
नयोर्जंबीरफलद्वयं वा निंबुद्वयं नाभौ वाभ्रकं वा नेमनः शिलां पित्ते हरितालं कफे समुद्रफेनं उधि
रे मधु पुरीषे गोमयं मूत्रे गोमूत्रं रेतसि पारजं शिश्ने गजरमेकं वृषणयोर्वृंताकद्वयं केशेषु नवस
रकसाटाः लोमचूर्णौ मांसस्थाने यवपिष्टेन माषपिष्टेन वा लिंपेत् इति शरीरं ततः पंचगव्यमंत्रैः

अं॰नि॰ष्टि 36

पंचगव्येन प्रोक्षयेत् पंचामृतमंत्रेण पंचामृतं स्नापयेत् ततः यत्ते यमं वैवस्वतमिति सूक्तेन प्राणाना
नीय तन्मंत्रास्तु ॐ यत्ते यमं वैवस्वतं मनो जगाम दूरकं तत्त आवर्त्तयामसी ह क्षयाय जीवसे॥
यत्ते दिवं यत्पृथिवीं मनो जगाम दूरकं तत्त॰ यत्ते भूमिं चतुर्भृष्टिं मनो ज॰ तत्त॰ यत्ते चतस्रः प्रदि
शो मनो॰ तत्त॰ यत्ते समुद्रमर्णवं मनो॰ तत्त॰ यत्ते मरीचीः प्रवतो मनो॰ तत्त॰ यत्ते आपो यदोषधी
मनो॰ तत्त॰ यत्ते सूर्यं यदुषसं मनो॰ तत्त॰ यत्ते पर्वतान् बृहतो मनो॰ तत्त॰ यत्ते विश्वमिदं जगन्म
नो जगाम॰ तत्त॰ यत्ते पराः परावतो मनो॰ तत्त॰ यत्ते भूतं च भव्यं च मनो॰ तत्त॰ एतत्सूक्तं प्राणा
नानीय ततः पारदं शुक्रमसि ज्योतिरसि तेजोऽसि देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण व
सोः सूर्यस्य रश्मिभिः इति मंत्रेक्षिप्त्वा ततः अक्षीभ्यामिति षट्चक्रेण तच्छरीरं स्पृशेत् ॐ अक्षीभ्यां
ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते ग्रीवाभ्यस्त
उष्णीहाभ्यः कीकसाभ्यो अनूक्यात् यक्ष्मं दोषण्यमंसाभ्यां बाहुभ्यां विवृहामि ते आंत्रेभ्यस्ते गुदा

भ्योवनिष्ठाद्धृदयादधि यक्ष्मंमतस्नाभ्यांयक्नः क्नाशिभ्योविवृहामिते उरुभ्यां तेअष्ठिवद्भ्यांपार्ष्णि
भ्यांप्रपदाभ्यां यक्ष्मंश्रोणिभ्याभासदाङ्कं ससोविवृ॰ मेहनाद्वनंकरणाल्लोमभ्यस्ते नखेभ्यः यक्ष्मं
सर्वस्मादात्मनस्तमिदंविवृ॰ अंगादंगाल्लोम्नोलोम्नोजातंपर्वणिपर्वणि यक्ष्मंसर्वस्मादात्मनस्त
मिदंविवृ॰ इतिमंत्रेणस्पृशेत् ततः तच्छरीरंस्नापइत्वा अलंकृत्यअयंसदेवदत्तइतितंअभिमृश्य
इदंचास्योपासनमित्यग्निंध्यात्वैवेतरण्यादिदानपूर्वकंपूर्वोक्तविधिनाशववद्दहेत् पलाश
वृंताकृणजराश्यादिसर्वाभावेकुशप्रतिकृतिः कुर्यात् आहिताग्नेः प्रतिकृतिदाहेस्त्रिदाहेवादशाह
मेवाशौचं आहिताग्नेस्तुत्र्यहं पर्णशरदाहेपुत्रपत्न्योः विदेशस्थमृतेयावद्विधिनानसंस्कारस्ताव
तसुत्रादीनांनाशौचंनचसंध्यादिकर्मलोपः सर्वाभावेधःकश्चित्कुर्यात् तस्यसर्वसपत्राग्नि
षत्रयानंतरं चूडाभावेपिऔर्ध्वदेहिकंमंत्रवत्कुर्यात् वर्षत्रयादर्वाक्कृतचूडाधिशक्तोसर्वं
मंत्रवत्कुर्यात् तदशक्तोतद्य कृतचूडोवानदग्निदानमेवमंत्रवत्कुर्यात् शिष्टमन्येनकारयेत्

अंतिष्टि०

37

एवंपत्न्याप्यग्निदानमात्रंसमंत्रकंकार्यंशिष्टमन्येनकारयेत् तथाचकात्यायनः असंस्कृतेनपत्न्या
सह्यग्निदानसमंत्रकं कर्त्तव्यमितरंसर्वंकारयेदन्यमेवहि सुमंतुः अनुपेतोपिकुर्वीतमंत्रवत्पै
तृमेधिकं यद्यसौकृतचूडः स्याद्यदिस्याद्यत्रिवत्सरः सपिंडीकरणादर्वाक्कुभावानिश्राद्धानि
विभक्तोभक्तोवासन्निहितएकएवकुर्यात् तत्रविभक्तेयथाशक्तिस्वकीयंद्रव्यंदेयं गृह्यपरिशि
ष्टे असगोत्रःसगोत्रोवायोदिस्त्रीयदिवापुमान् प्रथमेहनियोदद्यात्सदशाहंसमापयेत् तथा
उत्तरीयशिलापात्रंकर्तृद्रव्यविपर्यये पूर्वदत्तातुयोदद्यात्पिंडवाननतथैवच अथाचार्यविपर्ययेप्ये
कं एकादशाहादिकंतुदशाहकर्त्ताज्येष्ठपुत्रएववाकुर्यात् सपिंडीकरणंतुयोयोज्येष्ठपुत्रएवकुर्
यात् कनिष्ठोवापिवा नतुपुत्रादन्य पुत्रेसतिनान्यस्तत्राधिकारि तथा यवीयसाकृतंकर्मप्रे
तशब्दंविहायच सुलधीयसापिकर्त्तव्यंसपिंडीकरणंपुनः विभक्ताःपुत्राः ऋद्धिकामाश्चेत्पृ
थक्पृथगपिसपिंडीकरणंकुर्युः अविभक्तसुतेषुवार्षिकादिज्येष्ठयेवकुर्यात् विभक्ताःप्रत्येकं

पृथक्कुर्युः ब्रह्मचार्यादीनांदहनोदकदानाद्यधिकाराभावोवक्ष्यते पाखंड्यादीनांमृतानामधिकारि
णापिदहनादिनकार्यं तदाहयाज्ञवल्क्यः पाखंडयनाश्रितास्तेनाभर्तृघ्नः कामगादिकाः सुराप्यआ
त्मत्यागिन्योनाशौचोदकभाजनाः वेदबाह्यलिंगधारणंपाखंडं अनाश्रिताः सत्यप्यधिकारेआश्र
मविशेषरहिताः स्तेनाब्राह्मणस्वर्णव्यतिरिक्तोत्तमद्रव्यहारिणः सुराप्यइत्यादिउद्देश्यगतत्वाल्लिंग
मविवक्षितं आशौचमुदकं चैतन्मरणेन कार्यमित्यर्थः आत्महत्याबुद्धिपूर्वकमात्मघातिनः तेषु
विशेषमाहगौतमः प्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतामिति प्रायोमहाप्रस्था
नं अनाशकमनाशनं प्रपतनंशैलादेःपातः इत्यादिनिमित्तैः शास्त्राविहितमार्गेणइच्छापूर्वकं
मृतानामाशौचादिनेत्यर्थः तथाअंगिरः चंडालाद्युदकात्सर्पात्ब्राह्मणाद्वैद्युतादपि दंष्ट्रिभ्यश्च
पशुभ्यश्चमरणंपापकर्मणां उदकंपिंडदानंचप्रेतेभ्योयत्प्रदीयते नोपतिष्ठतुतत्सर्वमंतरिक्षेवि
नश्यति आश्वलायनपरिशिष्टेपि चंडालादीनांसंस्कारविधिस्तेषामन्नेवकार्योदकक्रिया रुदनं

अंत्येष्टि°

३८

नैवकर्त्तव्यंस्मृतकंचनबंधुभिः दग्ध्वाशरीरंप्रेतस्यसंस्थाप्यास्थानयत्नतः प्रायश्चित्तंतुकर्त्तव्यंपुत्रैश्चां
द्रायणत्रयं मनुः वृथासंस्कारजातानांप्रव्रज्यासुचतिष्ठतां आत्मनस्त्यागिनांचैवनिवर्त्तेतोदको
दकक्रिया वृथाजाताःपंचमहायज्ञाःरहिताः संस्कारजाताःप्रतिलोमजाः प्रमादानुपूर्वोक्तनिमि
त्तैर्मरणेप्रायश्चित्तमुक्तं चंडालाभिहतेविप्रेत्वंनक्षमतेपिवा दग्ध्वातिकृच्छ्रंचांद्रैश्चशुद्धिस्तत्रप्रकी
र्त्तिते तथा विषप्रमादमरणेभवत्यवाशौचादि तदाहांगिरः अथकश्चित्प्रमोदेनम्रियतान्यु
दकादिभिः तस्याशौचंविधातव्यंकर्त्तव्याचोदकक्रियेति प्रमादेचांद्रायणं तप्तकृच्छ्रद्वयंचकार्यं।
यद्वापंचदशकृच्छ्राणिकुर्यात् ततोविधिनादाहादि बुध्वाचंडालादिमृताग्न्यादीनातिष–त्तिः
स्मृताःउक्ताः वैतानंप्रक्षिपेदप्सुआवसथ्यंचतुष्पथे पात्राणितुदहदग्नौयजमानेवृथामृते।
वृथाविहितमार्गेण तेषांशरीरंगंगायामन्यत्रवामहानद्यांक्षिपेत् यद्वालौकिकाग्नौअमंत्रकं
दग्ध्वास्थीनिस्थापयेत् प्रायश्चित्तनारायणबल्यादौकृतेस्थीनिक्षीरेणक्षालइत्वाविधिनादहेत्

श्राद्धं कुर्यात् प्रायश्चित्तं नारायणबलिं वत्सरान्ते लोकगर्हपरिहारार्थं श्राद्धादौ योग्यत्वार्थं च कार्यौ नाराय
णबलिः कार्यो लोकगर्हभयान्नारिः तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः तेषां पाखण्ड्यादीनां बु
द्धिपूर्वं कात्मघातका अथैषामतिभक्ताशाः का: पुत्राद्याः संतिनदात्मघातकप्रायश्चित्तं द्विगुणं चान्द्रा
यणं तप्तकृच्छ्रचतुष्टयं च यद्वा त्रिंशत्कृच्छ्राणि कृत्वा पाखण्ड्यादीनां योग्यं सर्वप्रायश्चित्तं च कृत्वा नारा
यणबलिं च कृत्वा तद्दैवकालांतरे वा वत्सरादर्वाक् अपि दाहश्राद्धे कुर्युः अनित्यत्वदायुषः अकृ
तनिष्कृतानां पाखण्ड्यादीनां शेषाचानां स्पर्शने स्नानालंकरणवहनरज्जुच्छेदनदहनाश्रुपातकथादी
नदानात्कृत्वा महत्सांतपनं चरेत् ज्ञानात्तप्तकृच्छ्रं एतेषु कैकेकरणेत्वाज्ञानाद्रुपचासः मत्यभ्यासे कृच्छ्रा
तिकृच्छ्रं चान्द्रायणं योग्यतया कुर्यात् यस्तु वृद्धादिरचिकित्स्यगुरुव्याधियुतः प्रत्याख्यातभिषक् क्रिया
बुद्धिपूर्वकमप्यात्मानं घातयति प्रयागादौ तस्य न दोषः शास्त्रानुज्ञानमरणत्वात् तस्य प्रायश्चित्तना
रायणबलिन स्तः त्रिरात्रमेवाशौचं चतुर्थदिने एकादशाहांतं पंचमे सपिंडीकरणं स्वहाशौचेपि

अं०ति०ष्टि०

39

पिंडास्त्रयः दशवा अद्येत्येवाह्नि पिंडत्रयं दशांजलिपक्षे त्रयोंजलयः शतंजलिपक्षे त्रिंशत् मध्येह्नि पिंडचतु
ष्टयं चत्वारः चत्वारिंशद्वांजलयः द्वितीयदिनेस्थिसंचयनं एवमन्यत्रापित्र्यहाशौचे ब्रह्मचारिभिः पूर्वो
क्तपारवंड्यादिभिः पतितैः क्लीबैः प्रक्रांतप्रायश्चित्तदूतैश्च सपिंडादिमरणे दहनाशौचोदकदानादिनकार्यं
ब्रह्मचारीप्रक्रांतप्रायश्चित्तस्यैश्च मातापितृमहागुरुमातामहमातामहाचार्योपाध्यायानांकुर्यादेव त
त्रव्रतलोपोनास्ति विंतुस्तत्क्रांनेनाश्नीयात् नस्मृतकैभिः सहवसेत् मात्रादिव्यतिरिक्तप्रेतकर्मणे
पुनरुपनयनं ब्रह्मचारिणः याज्ञवल्क्यः एवंमतामहाचार्यप्रेतानामुदकक्रिया कामोदकं सखि
प्रत्तास्वस्त्रियश्वसुरर्त्विजां कामोदकमित्युक्तेः सख्यादावदानेपिनदोषः यमेनांजलिसंख्यायांविशे
षयुक्ताः पाषाणंततआदायविप्रेदेधाद्दशांजलीः द्वादशक्षत्रियेदद्यात् वैश्ये पंचदशस्मृताः त्रिंशत्
शूद्रायदातव्यास्ततःसंप्रविशेद्गृहं अथषोडशश्राद्धानि शतानिच मासिकानिदशैकंच आद्यंद्वेद्वा
मासिकं ऊनाब्दमुनषण्मासप्रेतश्राद्धानिषोडश आद्यर्धमासित्रैपक्षिकं नवश्राद्धं सपिंडत्वेश्राद्धा

न्यपि च षोडश एकेनैव तु कार्याणि संविभक्तधनेष्वपि तत्र च यथांशं सर्वैर्द्रव्यं देयं यद्यसद्यः शौचं तत्र
शंख: सद्यः शौचेपि दातव्यं प्रेतस्यैकादशेहनि स एव दिवसस्तस्य श्राद्धपिंडोदकादिषु सप्यासना
दिष्विति वा पाठः एकाहाशौचे तु दशाहकृत्यं तस्मिन्नेवाहनि द्वितीये चैकादशाह इति दोंदपद्धतौ के
चित्तु तत्रापि सद्यः शौचे देकादशाहमाहुः नवश्राद्धमासिकयोर्विघ्ने क एवः नवश्राद्धं मासिकं च
यद्यदंतरितं भवेत् तदुत्तरस्मात्तं त्याद नुष्ठेयं प्रचक्षते अंगिराः प्रथमेन्हि द्वितीयेन्हि पंचमे सप्तमे त
था नवमेकादशे चैव नवश्राद्धं प्रकीर्तितं शिवस्वामी नवश्राद्धानि पंचाहुराश्वलायनशाखिनः॥
आपस्तंबाः षडित्याहुर्विभाषा तैत्तिरीयकाः पंच एकादशाहिकव्यतिरेकेन भविष्यपुराणे वर्णितो व्यु
त्क्रमो नवस्वविशां राज्ञां नवश्राद्धान्यनुक्रमात् आद्यंतयोर्वर्णयोस्तु षडित्याहुर्महर्षयः वशां
नव राज्ञां सप्त तथा प्रेतश्राद्धे तु यत्सोत्र मर्घ्यार्थं परिकल्पितं तस्यैवोत्तानतां प्रोक्ताशेषेषु न्युब्ज
तामता प्रेतश्राद्धे न विकिर इति स्मृतिरत्नावल्यां तथा द्वादशाहे देयं कुर्यात्पितुः पित्रः सपिंडनं

अंतिष्टि०

40

एकादशेन्हिकुर्वीतप्रेतश्राद्धानिषोडश वस्त्रालंकारशय्यादिपितुर्यद्वाहनादिकं गंधमाल्यैःसमभ्यर्च्य
श्राद्धभोक्त्रेतदर्पयेत् तथा आशिषोद्विगुणादर्भाजयाशास्वस्तिवाचनं पितृशब्दस्वसंबंधः शर्म
शब्दःस्तथैवच पात्रालंभोऽवगाहश्च उल्मुकोल्लेखनादिकं तृप्तिप्रश्नश्च विकिरः शेषप्रश्नस्तथै
वच प्रदक्षिणाविसर्गश्च सीमांतेगमनं यथा अष्टादशपदार्थाश्च प्रेतश्राद्धे विवर्जयेत् सपिंडीक
रणं यावदृजुदर्भैः पितृक्रिया सपिंडीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेत् पतिष्टछत्रवेतीनारी
भर्तरग्रेमृतायदि वृषोत्सर्गं नकुर्वीत गांतुदद्यात्पयस्विनीं अन्वारोहणेतु नवश्राद्धानिसर्वा
णि सपिंडीकरणं पृथक् एकएव वृषोत्सर्गो रेकातत्रदीयते यत्तुशातातपः एकोद्दिष्टं जलं पिं
डं नाशौचं प्रेतसत्क्रिया न कुर्यात्सार्वणादन्यत्र भीमृतायभिःऽक्षवे उशना एकोद्दिष्टं नकुर्वी
त यतीनां चैवसर्वदा अहन्येकादशेप्राप्ते पार्वणंतु विधीयते मातृविषये शंखः मातुः सपिंडी
करणं कथं कार्यं भवेत्सुते पितामह्यादिभिः सार्द्धं सपिंडीकरणं स्मृतं पत्नीविषयेपि पैठिनसिः

अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडनं स्वस्त्रादिभिः सहैनास्याः सपिंडीकरणं भवेत् सपिंडीचज्ये
ष्ठपुत्राधिकारः तदुक्तं वायुपुराणे श्राद्धानि षोडशानि दत्वा कुर्यान्न तु सपिंडनं यो -- वसेत्पु
त्रः कालादप्यचिरादपि यदि षोडशश्राद्धानि कनिष्ठभ्रात्रादीनाकृतानि तदा -- त्वामेव कुर्यादि
त्यपरार्के पितृदशाहं कुर्वन् यदि पुत्रमृतस्तदा तत्पुत्रः पित्रोर्ध्वदेहिकानंतरं पितामहश्राद्धेऽप्य
क्रांते पितृमरणेन सति पित्राशौचं वहंत्रेव सकाले पितामहश्राद्धं पौत्रः कुर्यात्प्रक्रांतत्वादिति मद
नपारिजाते गोभिलः द्वादशाहादिकालेषु प्रमादादननुष्ठितं सपिंडीकरणं कुर्यात्काले श्रुत्त
रभाविषु श्रद्धस्य तु विष्णुः मंत्रवर्जं हि शूद्राणां द्वादशेहनि कीर्तितं अमावास्याश्राद्धकारिशूद्र
विषयेतदापरार्के कल्पतरौ च वचनबलाच्छाशौच एव कार्यं यत्तु कात्यायनः सर्वेषामेव वर्णा
नामाशौचांते सपिंडनं भिति तदेतद्व्यतिरिक्तविषयं ब्रह्मपुराणे आशौचांताद्धि वर्णानां दशमं
पिंडमुत्सृजेत् श्राद्धांते पिंडदानांते शुद्ध्यर्थं श्राद्धमाचरेत् सपिंडीकरणे पितरमंमृते ब्रह्मपुरा

अंतिष्टि० राणे मृतेपितरिपरयाविद्यतेचप्रपितामहः तेनदेयास्त्रयःपिंडाःप्रपितामहपूर्वकः तेभ्यश्चपैत्रिको
पिंडोनियोक्तव्यश्चपूर्ववत् मातर्यग्रमृतायांतुविद्यतेचऽपितामही प्रपितामहिपूर्वंतुकार्यस्तत्राप्य
यंविधिःयुक्तामाद्यप्रमीतानांनैवकार्यंसपिंडनं मातापितृभर्तृव्यतिरिक्तविषयं अतएववक्ष्या
दे व्युत्क्रमेणमृतानांनसपिंडीविधिरिष्यते यदिमातायदिपिताभर्त्तानैषविधिस्मृतः एषविधिः
सपिंडननिषेधरूपः क्षत्रियादिरपिमहैकोद्दिष्टमेकादशेहन्येवकुर्यात् नतुसूतकांते नदाहदृढ
वसिष्ठः एकादशेन्हियच्छ्राद्धंतत्सामान्यमुदाहृतं चतुर्णामपिवर्णानांसूतकंतुपृथक्पृथक् लौगा
क्षिरपि आद्यंश्राद्धमशुद्धोपिकुर्यादेकादशेहनि कर्तुस्तात्कालिकीशुद्धीरशुद्धःपुनरेवसः रुद्र
गणश्राद्धंतुक्षत्रियादिसूतकांतेकुर्यात् एकादशेहनितथाविधानेकादशेवतु क्षत्रियादिःसूतकां
तेभोजयेदयुजोद्विजा इतिमत्स्यपुराणे इदंरुद्रगणपरत्वेनव्याख्यातंमदनपारिजाते गोभि
लः ब्राह्मणंभोजयेत् दाद्युहोतव्यमनलेथवा पुनर्भोजयेद्विप्रंद्विरावृत्तिर्भवेदिति अंगिराः

५१

अस्यसंवत्सरादर्वाक्सपिंडीकरणंकृतं मासिकंचोदकुंभंचदेयंतस्यापिवत्सरं पैठिनसिः सपिंडीक
रणादर्वाक् कुर्यात्श्राद्धानिषोडश एकोद्दिष्टविधानेनकुर्यात्सर्वाणितानित् सपिंडीकरणादूर्ध्वं
येदाकुर्यात्तदापुनः प्रत्यब्दंयोयथाकुर्यात्तथाकुर्यात्सतान्यपि शाट्यायनिः सपिंडीकरणादर्वागपक
ष्यकृतान्यपि पुनरप्यपकृष्यंतेरध्युत्तरनिषेधनात् वृद्धिश्राद्धानंतरंतन्निषेधादित्यर्थः तथारात्रौ
जननेमरणेरजोदर्शनादौचत्रयःपक्षः अर्धरात्रपर्यंतंपूर्वेदिनगणनाच्च त्रिभागायारात्रेर्भाग
द्वयंपूर्वदिनांतर्गतंवा सूर्योदयावधिपूर्वदिनमेवेतिवा तदाहकश्यपः उदीरतेरुदयास्मर्येनारीणां
दृश्यतेरजः जननंवाविपत्तिर्वायस्याहस्तस्यशार्वरी अर्धरात्रावधिःकालःसूतकादौविधीयते॥
रात्रिंद्विभागंतुद्वौभागौपूर्वएवतु उत्तरांशःप्रभातेनयुज्यतेमृतसूतके रात्रावेवसमुत्पन्नेमृतेरज
सिसूतके पूर्वमेवदिनग्राह्ययावन्नाभ्युदितेरवाविति अत्रदेशाचारव्यवस्था अथरात्रौदाहा
निर्णयादेवआनीये रात्रौवारात्रिशेषेवाम्रियतेचद्विजातयः दाहंकृत्वायथान्यायंद्वौपिंडौनिर्वपे

अंतिष्ठि०

त्सनः निगमः संध्यायांवा तथा रात्रौ दाहपाथे च कर्मे च नवश्राद्धं च नो कुर्यात् कृतं निःफलतां व्रजेत् रात्रौ मृ
तस्य तु रात्रावेव दाहः वपनं तु प्रातः उक्तं च स्मृतिसंग्रहे रात्रौ दग्ध्वा तु पिंडांतं कृत्वा वपनवर्जितं वप
नं शेष्यते रात्रौ स्वस्त्तना वपनक्रिया निगमवचनं तु दिनमृतस्यालस्यादिना रात्रिदाहनिषेधार्थं दशा
हान्तर्दर्शपाते भविष्यपुराणे प्रवृत्ताशौचतंत्रस्तु यदि दर्शः प्रयच्छति समाप्यचोदकं पिंडान् स्नानमा
त्रं समाचरेत् मातापितृविषये तु गोतमः अंतर्दशाहे दर्शश्चेत्तत्र सर्वं समापयेत् पित्रस्तु यावदाशौ
चं दद्यात् पिंडतिलांजली पित्रोरन्त्येकशेषः यत्तु गालवः पित्रोराशौचमध्येपि यदि दर्शः समापयेत्
तावद्देवोत्तरं तंत्रं पर्यवस्येत्त्र्यहोत्तरमिति तदनौरस पुत्रो यदा करोति तद्विषयं आपदादिविषयं चे
ति पारिजाते पाराशरमाधवीये निर्णयामृते च त्र्यहानंतरं दर्शे मातापितृतंत्रस्यापि समाप्तिर्न तु
त्र्यहमध्ये दर्शपाते तद्विषयमेव गोतमवचनं अन्येषां यदापि दशाहमध्ये दर्शपाते तंत्रसमाप्तिरि
ति दाहकालेग्निनाशे दग्धकाष्टैरग्निं मथित्वा तेन दहेत् ॐ भूर्भुवः स्वः स्वाहेत्याज्याहुतिं हुत्वा लौकि

केनाग्निना वा तद्देहं महाजले वा क्षिपेत् दशाहं प्रेतपिंडं दत्वा स्नात्वा भुक्त्वा असपिंडस्य त्र्यहोपवासः
सपिंडस्यैकाहः मातापितृद्विगुरुणं द्वयोः प्रेतकृत्यं कुर्वतो नास्ति चयनादर्वाक् स्त्रीसंगे चांद्रं ऊर्ध्वं कायत्रं
अन्येषां प्रेताशौचिनां पूर्वं संचयनात् त्रिरात्रं पश्चादुपवास इत्यादि स्मृत्यंतरेभ्यो ज्ञेयं अन्यदप्युक्तं कारि
कायां पत्नीमपि दहेदेवं भर्तुः पूर्वं मृता यदि अनग्निको दहेदेवं कपालेन हविर्भुजा अग्निवर्णं कपालं
तु कृत्वा तत्र विनिक्षिपेत् कृशिपादितरो यस्तु जातः स तु कपालजः अनुपनीतस्याप्येवं स्मृत्यंतरे तु गृह
स्थो ब्रह्मचारी तु विधुरो विधवा स्त्रियः औपासनश्चेत्ते पनस्तुषाग्निश्च कपालजः देवलः चंडालाग्नि
रमेध्याग्निः सूतिकाग्निश्च कर्हिचित् विपत्तिताग्निश्चिताग्निश्च न शिष्टग्रहणादितः आहिताग्नेर्द
शांतरमरणे विशेषस्तत्रैव यस्मिन् देशे स्थितो वह्निस्ततो न्यत्र मृतो यदि चरुः पथि कृतः कार्यः घृणां
कृतिं रथेपि वा अन्यदीयेन वसनेन यागोस्तु पयोधरा आशरीराहृतस्तस्याः पयसा होम इष्यते अन्य
स्या अपि हातव्यं पयसा तदसंभवेत् तथा कृष्णपक्षे प्रमीयेत यद्यह्नि प्रातराहुतिः शेषास्तु जुहुया

४३

43

दर्शपर्यंताः पक्षहोमवत् तदानीमेवजुहुयात्सायंकालाहुतीरपि सायंमृयुते च तत्सायंमाहुतीः जुहुया
तथा तदानीमेवजुहुयात्प्रातःकालाहुतीरपि स कृद्गृहीतमंत्रेष्टभिन्नतंत्रं च होमयोः दर्शवाविप्रकु
र्वंतिस्थालीपाकं तदेवतु होमदार्शेनिकर्त्तव्योकुर्वीत पुनर्यदिसजीवतो म्रियेतोअवसथ्याग्निनैवे
नंवाजपेनतदा म्रियेताधिश्रियेनित्यहोमद्रव्योहविः स्रुच यथानिःशेषदग्धानि तथातवद्दहेतदा ॥
बर्हिष्यासादितेष्वेवहविष्येम्रियेतेतदा यासांपरिगृहीतानिदेवतानांहवींषितु चतुर्थ्यंतानिनामानि
तावतीनांवदेत्तथा स्वाहाकारेणयुगपत्सर्वाणिजुहुयादथ नेष्टंस्विष्टकृताद्यत्रशेषंकार्यमिति
स्थिति पिंडप्रमाणंतु एकोद्दिष्टसपिंडेचकपित्थंतुविधीयते नारिकेलप्रमाणंतु प्रत्यब्दे मासिके तथा ॥ सि
दर्शेतीर्थेषुसंप्राप्ते कुक्कुटांडप्रमाणतः महालये गयेश्राद्धे कुर्यादामलकोपमं प्रथमेहनि पिंडेचमु
खमूर्धाचजायते चक्षुश्रोत्रेनासिके च द्वितीयेहनिजायते भुजौवक्षस्तथाग्रीवा तृतीयेहनिजाय
ते नाभिस्थानंगुदंलिंगं चतुर्थेहनिजायते उरौतु पंचमेज्ञेयो षष्टे मर्मसमुद्भवः सप्तमेत्वकशिरास्थी

निसर्वेलोमानिचाष्टमे नवमेवीर्यसंपत्तिर्दशमेक्षुत्पिपासके अनुगम्येच्छयाप्रेतंज्ञातमज्ञातमेववा॥
स्नात्वासचैलंस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यति घृताभावेतुगायत्र्यादशकृत्वापिबेदपः ज्येष्ठेनवाकनिष्ठे
नसपिंडीकरणेकृते देशांतरगतानांतुपुत्राणांतुकथंभवेत् श्रुत्वातुपक्वनेकार्यंदशाहांतंतिलोदकं
ततःसपिंडीकरणंकुर्यादेकादशेहनि द्वादशाहेनकर्त्तव्यामितिशातातपोब्रवीत् स्मृत्यर्थसारे॥
ब्रह्मचारिणामनपत्यानांचसपिंडीकरणंनास्ति तेषांसदैवैकोद्दिष्टमेव व्युत्क्रममृतानांव्यवहितेः
सपिंड्यंकार्यंनवा केचित्सर्वेन्नसपिंडनमाहुरिति यतःतेषांप्रेतत्वंनास्ति ततस्तेषांनेकोद्दिष्टंनसपिं
डीकरणं केचित्वेकादशेहनिपार्वणंकार्यं उदग्रहणात्सर्वेमृतेनदाहादिनसपिंडानांतंसर्वंकार्यमे
व॥ ॥इतिश्रीभट्टरामेश्वरसूरिसूनुनारायणभट्टकृतायामौर्ध्वदेहिकपद्धतौउपयोगितोनिर्णयः॥
॥ ॥ततःमहैकोद्दिष्टविधिः तस्मिन्नेवाहन्येकंब्राह्मणंनिमंत्र्यतस्यस्मश्रुकर्माभ्यंगादिकारयित्वा
एकोद्दिष्टएकोविप्रः द्विवोवाभिमंत्रिणं एकमर्घ्यपात्रंताम्रमयं धूपदीपौनस्तः स्वधाशब्दपितृश

अंतिष्टि०

५५

स्वनमः शब्दान्नसंति नाभिश्रवणं सर्वप्राचीनावीतिनैव कार्यं दैवंनास्ति अग्नौकरणं एक एव पिंडः अ
नुमंत्रणादि सर्वममंत्रकं अक्षय्यस्थाने उपतिष्ठतामिति वदेत् श्राद्धशेषान्नभोजनं न कार्यं अंते स्नानं॥
नवश्राद्धे नैकोद्दिष्टे तु सर्वं मंत्रकं स्मृत्यर्थसारे अत्र प्रयोगः ग्रामाद्बहिः शुचौ देशे गोमयोपलिप्ते पाकं सं
पाद्य ब्राह्मणं स्नायात् ततः अद्येत्यादि देशकालौ संकीर्त्य अमुकतिथौ अमुकगोत्रस्यामुकशर्मणः
प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकप्राप्त्यर्थं मरणादिनादारभ्य एकादशेऽहनि विहितं महैकोद्दिष्टश्राद्धं
करिष्ये इति संकल्प्य गोत्रस्यामुक० महैकोद्दिष्टश्राद्धे क्षणमुपतिष्ठतु एवं सर्वत्र पाद्यमु० आसन०
तत्रार्घ्ये दक्षिणाग्रकुशोपरि एकमर्घ्यपात्रमासाद्य तत्रैकं पवित्रं जलं च क्षिप्त्वा अद्भिः पूरयित्वा तिलो
सि सो० प्रत्नवद्भिः प्रत्नस्वधाया प्रेतमिमांल्लोकान् प्रीणयाहि नः स्वधा नमः इति मंत्रेण तूष्णीं वा तिला
न् क्षिप्त्वा अमुकगोत्रेत्यादि संबुध्या प्रेतानां नमस्कार्य महैकोद्दिष्टश्राद्धे अर्घ्यमु० गोत्रेत्यादि० गंधमु० पुष्प
आच्छादनमु० ततः पात्रे घृताक्तं सिद्धमन्नमादाय विप्रपाणौ प्रक्षालितं दर्भो नास्तीयं अमुकगोत्रा

यामुकशर्मणे प्रेताय स्वाहा इति हस्ते एकाहुतिं हुत्वा तदन्नमग्नौ प्रक्षिपेत् नवा होमः ततः परिवेष्टनादि
अंगुष्ठनिवेशनांतं कृत्वा अमुकगोत्रायामुकशर्मणे प्रेताय इदमन्नं यथाशक्तिसोपस्करं अमृतरूपं क
व्यमुपतिष्ठतु इत्यन्नं आपोशनादि दद्यात् तृप्तिप्रश्नं नास्ति ततः अमुकगोत्रेत्यादि संबुध्या प्रेताय तुभ्यमु
त्का पिंडप्रदानं करिष्ये पिंडस्याधः दर्भासनमु॰ तस्योपरि तिलोदकं॰ गोत्रस्यामुकशर्मणः प्रेतस्य॰
एकादशेहनि महैकोद्दिष्टश्राद्धे अयं चरुपिंडमु॰ पिंडस्योपरि तिलोदकमु॰ गंध॰ पुष्प॰ भृंगराज॰
धूप॰ दीप॰ नैवेद्य फल तांबूल दक्षिणामु॰ दर्भशाखामु॰ सर्वं चमुपति॰ आसनादि॰ विसर्जनांतं
कृत्वा ब्राह्मणाय तांबूलं दक्षिणां च दद्यात् ततः प्रेतस्य वस्त्र शयनासनाभरणानि पादुकाछत्रो
दकपात्रवाहनादीनि यथाशक्ति दद्यात् भूयसीं दक्षिणां दत्वा संतोषयेत् इति महैकोद्दिष्टं॥ अथ य
थासंभूति मध्यमहादानानि उच्यंते तत्रैव एकादशेहनि मोक्षधेनुदानं पवित्रंपाणिः आचम्य प्राणानाय
म्य देशकालौ संकीर्त्य अमुकगोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वनिर॰ सायुज्यताप्राप्तिकामो मोक्षधे

६५

45

अं॰ति॰ष्ठि॰

नुदानं करिष्ये ततः ब्राह्मणं च गां च यथाशक्ति वस्त्रादिभिः संपूजयेत् तद्यथा करिष्यमाणं गोदाने प्रति
गृहीतारं त्वामहं वृणे इति वरणं कृत्वा अमुकशर्मणे ब्राह्मणतो त्वामावाह्य [illegible] आ
सनपाद्यादिभिः षोडशोपचारैः संपूजयेत् ततः पक्षे गोशरीरे देवता आवाहयेत् शृंगामूले ब्राह्मणं
विष्णुं आवाहयामि शृंगाग्रे सर्वतीर्थान्यावा॰ शिरोमध्ये महादेवं आ॰ ललाटाग्रे गौरीं आ॰ नासावं
शे षण्मुखं आ॰ नासायुग्मे कंबलाश्वतरौ नागौ आ॰ कर्णयोरश्विनौ आ॰ चक्षुषोः शशिभास्करौ
वा॰ दंतेषु वायुनावा॰ जिह्वायां वरुणं आ॰ हुंकारे सरस्वतीं आ॰ गंडयोः मासपक्षौ ओष्ठयोः संध्ये
आ॰ ग्रीवायामिंद्रं आ॰ वक्षाग्रेषु पन्नगानावा॰ खुरपश्चिमाग्रेषु अप्सरसां गंधर्वान् आ॰ पृष्ठे रुद्रा
न् आ॰ सर्वसंधिषु वसून् आ॰ श्रोणितटे पितॄन् आ॰ लांगुले सोमं आ॰ वालेषु आदित्यरश्मीन्
आ॰ गोमूत्रे गंगां आ॰ गोमये यमुनां आ॰ क्षीरे सरस्वतीं आवाह॰ दध्नि नर्मदां आ॰ सर्पिषि हुताश
नं आ॰ उदरे पृथिवीं आ॰ पयोधरेषु सागरान् आ॰ कृत्स्नशरीरे कामधेनुं आ॰ गृहा वै प्रतिष्ठा सूक्तं॰

ततः षोडशोपचारैः संपूज्य आगावोअग्मन्नुतभद्रमक्रन्त्सीदंतिगोष्ठेरणयंत्वस्मे प्रजावती पुरुरूपा
इहस्युरिंद्रायपूर्वीरुषसंदुहानाः इतिमंत्रेण मंत्रपुष्पं॰ ततः सवत्सांगांप्राङ्मुखीं भवस्थाप्यदातापुच्छ
देशेबद्धशिखः प्राङ्मुखस्तिष्ठेत् पात्रभूतोविप्रस्तत्रैवदक्षिणतउदङ्मुखस्तिष्ठेत् दानाययथाशक्ति
कनकयुतमाज्यपात्रमादायतत्रगोपुच्छंनिक्षिप्यतत्रैवसतिलेप्राग्ग्रेविप्रपाणौघृतदिग्धंसतिलकु
शंपुच्छंनिक्षिप्यजलंक्षिपेत् तत्रमंत्रः यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी विश्वरूपधरोदेवःप्री
यतामनयागवे गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच ॐगा
वोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः गावोमेहृदयःसंतुगवांमध्येवसाम्यहं अमुकप्रवरान्वितामुकगो
त्रोत्पन्नायामुकशाखाध्यायिनेमुकशर्मणेब्राह्मणायतुभ्यमिमांसवत्सांसुवर्णशृंगीरौप्यखुरान्
ताम्रपृष्ठींमुक्तालांगुलांकांस्यदोहांरक्तवस्त्रावृतांघंटालंकृतकंठांगंधपुष्पमालाशोभितां एतावद
संभवेयथाशक्तिअलंकृतांवासंप्रददेनममेतिवदन् ब्राह्मणः प्रतिगृह्य मायुक्त्वा स्वस्तीतिवदेत्

अंतिष्टि०

46

ततः सुवर्णोपशमितं यथाशक्ति वा हिरण्यं सतुलसीदलं दक्षिणां दद्यात् कृतस्य गोदानस्य संपूर्णतायै इ-
मां दक्षिणां तुभ्यमहं संप्रददे न ममेति पूर्ववत् ब्राह्मणो वदेत् इति मोक्षधेनुदानं अथ शय्यादानविधिः
आचम्य देशकालौ संकीर्त्य अमुकगोत्रस्यामुकनाम्नः प्रेतस्य प्रेतत्वनिवृत्त्यर्थं उत्तमलोकप्राप्त्यर्थं म-
रणदिनादारभ्य एकादशेऽहनि विहितं शय्यादानं करिष्ये इति संकल्प्य तदंगत्वेन पात्रपूजनं शय्यास्थ-
प्रेतप्रतिमायां प्रेतपूजनं करिष्ये अमुगोत्रं अमुकनामानं प्रेतमावाहयामि एवं षोडशोपचारैः संपूज्य।
ततः शय्याशिरःप्रदेशे घृतपूर्णं कुंभं निधाय पार्श्वतः सप्तधान्यानि निधाय शय्यायां नारिकेलादिफलं
च निधाय तत्र दानमंत्रः अस्मादशून्यं शयनं केशवस्य शिवस्य च शय्या ममाप्यशून्यास्तु तथा जन्म-
नि जन्मनि इमां शय्यां सारदारुमयीं तुलीकोत्तरच्छदं तां प्रेतप्रतिमायुक्तां सुगंधोपरिधान घृतकुं-
भसप्तधान्य तांबूलपात्र फलयुक्तां कर्पूरकुंकुमागरुचंदनदीपिकोपमां छत्रचामरवितानआस-
नभोजनभाजनदक्षिणातुलसीदलयुक्तां अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे न ममेत्युक्त्वा इति

वदेत् प्रतिगृहीतास्वस्तीत्युक्त्वादेवस्यत्वेतिप्रतिगृह्णीयात् ततः स्वकरे धृत्वा शय्यामुपवेशयेत् पूर्णतां वा
चयित्वा दाताकृतस्यशय्यादानस्यसंपूर्णतायेइदंहेमसुवर्णपरिमाणंवायथाशक्तिदक्षिणांचेनतु
भ्यमहंसंप्रददेइतिपात्रहस्तेदद्यात् प्रतिगृहीतास्वस्तीत्युक्त्वा कृ इदंकस्मादाइतिवह्वृचः पठेत् यजुः
सास्वादेवस्यत्वेतिपठेत् अयसींदक्षिणांदत्वाश्रीकर्मेश्वरार्पणंकुर्यादिति कौस्तुभेमृतशय्यादान
विधिः॥ ॥ॐ अथविधानानि तत्रब्रह्मचारीमरणेविधानमालायांविशेषः येषांकुलेब्रह्मचारीनिधा
नंप्राप्नुयाद्यदि तत्कुलंक्षयमाप्नोतिसोपितृदुर्गतिमाप्नुयात् गृहत्वंप्राप्नुयाद्वोधिद्रुमेनावनरंवसत् तस्मा
पितस्यवंशस्यगतिंगमिच्छन्महीयसी विधानंचविधायावश्यौर्ध्वदेहिकमाचरेत् मृतस्यम्रियमाणस्य
षड्वंद्व्रतमादिशेत् त्रिंशद्भ्योब्रह्मचरीभ्योदद्यात्कौपीनकाभवान् हस्तमात्राः कर्णमात्राः दद्यात्कृ
ष्णाजिनानिच पादुकोछत्रमाल्यानिगोपीचंदनमेवच मणिप्रवालमालाचब्रह्मसूत्राणिचार्पयेत्॥
मंत्रैस्तत्तद्दलिंगैश्चब्रह्मसायुज्यसिद्धये अभावप्रतितः पूज्यागृहस्थाः साधवः शुभाः एवंकृतेविधा

९६

अंतिष्टि०

नैवविघ्नमस्यनजायते ब्रह्मचारीमरणेकैर्विधाहशौनकोक्तः ब्रह्मचारीमृतोसतिकथयाभिसमासतः
तत्रावकीर्णिदोषस्यप्रायश्चित्तंप्रशांतये द्वादशाब्दंषडब्दंवात्र्यब्दंशक्त्याथवाचरेत् स्नातकोब्रह्मचारी
चनिधानंप्राप्नुयाद्यदि संयोज्यचार्कविधिनासंयोज्योतोततःपरं अथप्रयोगः आचम्यप्राचीनावी
तिएवंगुणेत्यादिअमुकगोत्रस्याअमुकनाम्नोमृतस्यब्रह्मचारिणोव्रतविसर्गंकरिष्ये तदंगहिर
ण्येननांदीश्राद्धंचकरिष्ये इतिसंकल्प्य अग्निमुपसमाधायान्वाधानाद्याघारांतंकृत्वाचतुष्पात्र
यप्रयोगः प्रोक्षणीस्रुवौप्रणीतोऽन्यपात्रमितिसंमार्गीतेस्रुवेणआज्यंजुहुयात् व्याहृतयःश्वतस्रः४
अग्नयेव्रतपतयेस्वाहेतिपंचयः अग्नयेव्रतानुष्ठानफलसंपादनायस्वाहेतिषष्ठं ६ विश्वेभ्योदेवेभ्यः
स्वाहेतिसप्त ७ ततःस्विष्टिकृतादिसमाप्य इतिव्रतविसर्गः अथार्कविवाहः अर्कसमीपेथवाअर्क
शाखामानीय ततःअर्कब्रह्मचारिणोहरिद्रयानुलिप्यपीतसूत्रेणवेष्ट्यवस्त्रयुग्मेनाच्छाद्यदेशका
लौसंकीर्त्यअमुकगोत्रस्यामुकशर्मणःप्रेतस्यऔर्ध्वदेहिकक्रियाधिकारार्थंअर्कविवाहंकरिष्ये
इतिसंकल्प्य तदंगत्वेनहिरण्येननांदीश्राद्धंकरिष्ये ततःअग्निमुपसमाधायन्वाधानाद्याघारांतं

पूर्ववत्कृत्वाप्रधानहोमः आज्यं अग्नयेस्वाहा अग्नयइदं॰ बृहस्पतयेस्वाहा बृहस्पतयइदं॰ विवाहविधि
योजकायस्वाहा विवाहयोजकायइदं॰ ॐ यस्मैत्वं कामकामाय वयं सम्राड्यजामहे तमस्मभ्यं कामं-
त्वादं घृतस्वस्वाहा कामायइदं॰ चतस्रोव्याहृतयः ततः स्विष्टिकृतादिहोमं समाप्य कर्मणः पुण्या
हं भवंतोब्रुवंतु कर्मणः ऋद्धिं भवंतोब्रुवंतु वृद्धिं भवंतोब्रुवंतु कर्मणः श्रीरस्त्विति भवंतोब्रुवंतु
कर्मणः कल्याणं भवंतोब्रुवंतु अस्तु कल्याणं इत्यर्कविवाह अर्कशाखायां ब्रह्मचारीशवं चतुष्पा
ग्निनाविवदहेत् इति ब्रह्मचारीमरणविधिः अथ कुष्टमरणेनियमः मृतस्य कुष्टिनो देहं निख
नेद्गोष्ठभूमिषु वा सरस्त्रितयं पश्चात् उद्धृत्यान्यत्रतं दहेत् न गंगाप्लवने कार्यं निक्षेपविधिरुच्यते
षडब्दं व्रते पूर्वेणविधिनात्यक्तं तु चरेत् अस्थिसंचयनं तस्य गंगायां प्रक्षिपेत्सुधीः मासिमासि
ततकुर्यान्मासिश्राद्धानि यावेणात् संकल्पविधिना केचित्प्रवदंति मनीषिणः इत्येतत्कुष्टिनो
त्यूर्ध्वे कथितं शास्त्रकोविदैः स्मृतिवह्निमनुच्चार्ये यमाद्यैर्यज्ञविग्रहैः इति कुष्टिमरणविः॥ ॥

अं ति ष्टि०

४८

॥ ॥अथपंचकमरणविधिः॥ ॥गरुडपुराणे॥ ॥आदौकृत्वाधनिष्ठार्धं मेतंनक्षत्रंपंचकं॥रेवत्यांतंसदा
तुष्यमशुभंसर्वदाभवेत् दाहस्तत्रनकर्त्तव्योविषादःसर्वजातिषु नजलंदीयतेतंतुह्यशुभंसर्वदाभवेत्॥
पंचकानंतरंकार्यंकर्त्तव्यंसर्वमन्यथा पुत्राणांगोत्रिणांतस्यसंतापोह्यपजायते गृहेहानिर्भवेत्रेष्ठ
ऋक्षेष्वशुमृतस्तुयः शवस्यसमीपे--क्षेप्तव्यापुत्तलास्तदा दर्भमयास्तुचत्वारः ऋक्षमंत्राभिमंत्रि
ताः ततोदाहप्रकर्त्तव्योतेश्चपुत्तलकैःसह सूतकांतेतदापुत्रैःकुर्याच्छांतिकपौष्टिकं पंचकेषुमृतेयो
सौनगतिंलभतेनरः तिलांश्चैवहिरण्यंचतदुद्देशेष्टतंददत् विप्राणांदीयतेदानंसर्वविघ्नविनाशनं
॥ ॥अथब्रह्माण्डपुराणे॥ ॥कुंभमीनस्थितेचंद्रेमरणंयस्यजायते॥नतस्योर्ध्वगतिर्दृश्यासंततोनशु
भंभवेत् नतस्यादाहकर्त्तव्योविनाशःसर्वजातिषु तस्माज्जलेषुदाहेनसर्वजातिसुखंभवेत् पुत्राणां
तस्यसंतापागतिस्तस्यनजायते पंचकानंतरंकार्यंकार्यंदाहादिकंखलु अथवातद्दिनेकार्योदा
हस्तुविधिपूर्वकं क्रियांतेमानुषाणांतुसद्यःसद्गतिकारणात् विप्रस्यनिहतःकार्योदाहस्तुविधि

पूर्वकः धनिष्ठापंचके जीवो मृतो यदि कथंचन त्रिपुष्करे याम्यभे च कुलजान्मारयेद्ध्रुवं . तत्रानिष्टविनाशा-
र्थं विधानं समुदीर्यते दाहदेशे शवं नीत्वा स्नापयेच्च प्रयत्नतः तदा त्वावसमीपे तु कर्तव्याः पंचपुत्तलाः दर्भ-
मयाः शवसुखाः कर्तव्याश्चाप्यनुक्रमात् प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः प्रेतहर्ता पंचमस्त-
नामान्येतान्यनुक्रमात् दर्भाणां प्रतिमा कार्याः पंचसूत्रेण वेष्टिताः यवपिष्टेनानुलिप्तास्ताभिः सह श-
वं दहेत् ततो दाहश्च कर्तव्यो नेत्रपुत्तलकैः सह शिरो हृद्दक्षिणकुक्षौ वामकुक्षौ चतुर्थकं पंचमं पाद-
योर्मध्ये तेभ्यो दद्याद्घृताहुतिः उदकं च ततो दद्यान्नामभिस्तैः पृथक् पृथक् रात्रौ विहाय स्नपर्युदकं
नामभिः क्रमात् सूतकान्ते तथा विप्रैः शांतिं कुर्याद्यथाविधिः अन्यथा न गतिर्याति प्रेतं पुत्रेषु नाशुभं ।
कलशान्निसवस्त्राणि सौवर्णान्तु रूपकाः शालितंडुलपुंजेषु प्रतिमादेरभावितः पंचरत्नसमासाज्यं
प्रदद्यात्कांस्यभाजनं स्वगृह्योक्तविधानेन कृत्वाग्नेः स्थापनं द्विजः अभिधानं निर्वपणं देवतानां तथा
शृणु यमाय धर्मराजाय मृत्यवे चांतकाय च वैवस्वताय कालाय सर्वभूतक्षयाय च औदुंबराय

द्भवाय नीलायपरमेष्ठिने एकोदशायचित्रायचित्रगुप्तायवैक्रमात् विधिनाश्रपणंकृत्वाएकैकामाहुतिंहु
नेत् स्तकांतः ततःपुत्रःकुर्याच्छांतिकपौष्टिकं कांस्यपात्रस्थितेआज्यंवीक्ष्यदद्याद्द्विजन्मने ब्रह्माविष्णु
महेशेंद्रवरुणःप्रतयेततः माषमुद्गयवव्रीहिप्रियंग्वादिप्रयच्छति स्वर्णदानंरुद्रजपंलक्षमोहोद्विजा
र्चनं गोभूःदानंषडंशेनकुर्याद्दोषापशांतये अन्यत्रापि धनिष्ठापंचकमृतेपंचरत्नानितन्मुखे न्य
स्याहुतित्रयंदद्यान्कृत्वोबहुवपामिति ततोनिर्हरणंकुर्यात् एषःसाग्नेर्विधिःस्मृतः एकैकाहुतिचर्वाज्ये
जुहुयान्नामभिःक्रमात् यमादिदेवतानांचचरुहोमंशिवायवै इध्येश्चतुर्भिःसाहस्त्रंशांत्यर्थंजुहुयात्सु
धीः घृतेनाज्यसमित्कृष्णतिलैरेकत्रहोमयेत् इत्थंसमाप्यहवनंदद्याद्धेनुपयस्विनं तिलांदत्वायथाश
क्तिसुवर्णंवस्त्रमेवच दत्वाचसप्तधान्यानिभोजयेच्चकिमिच्छसि आज्यंनिरीक्ष्यदत्वाचब्राह्मणान्भोज
येत्ततः अन्यान्विप्रान्यथाशक्त्यातेभ्योदद्यात्तुदक्षिणां ततःपश्येन्मंगलानिस्वस्तिवाच्योद्विजोत्तमैः
पूजयेत्क्षणवरंलिंगगोभ्योदद्याभरणादिकं एवंयःकुरुतेयस्यप्रेतस्यचभवेद्गति वालवृद्धश्चयूनश्च

पंचके मृतस्य च निधानं नैव कुर्वंति विघ्नस्तेषां न जायते तस्मात्सर्वप्रयत्नेन शांतिं कुर्याद्यथाविधि कृत्वा तु गो
त्रजाः सर्वे सुखिनः श्चिरजीविनः भवंति नात्र संदेहो नात्र कार्या विचारणात् इति ब्रह्मांडपुराणे पंचकम
रणविधिः अथ पंचकशांतिप्रयोगः आचम्य प्राणायामं कृत्वा देशकालौ संकीर्त्य अमुकगोत्रस्यामुकश
र्मणः प्रेतस्य प्रेतत्वनिवृत्त्यर्थं पंचकमरणनिमित्तसूचितवंशानिष्टनिरशनार्थं पंचकशांतिं करिष्ये इति
संकल्प्यः तद्दंगस्थंडिलउपलेपन उल्लेखनाग्निप्रतिष्ठापनं च देवतापूजनपूर्वकहोमं करिष्ये पंचगव्ये
न शुचीवोहव्येति प्रोक्षयेत् ततः स्थंडिलादि अग्निप्रतिष्ठां तं कृत्वा ध्यायेत् ततः स्थंडिलादिपूर्वभागे कल
शस्थापनं कुर्यात् महीद्यौरितिभूमिं स्पृशेत् या ओषधीमिति धान्यं आकलशेष्विति कलशं स्थाप्य इमं
मे गंगे इति उदकं सरस्वतीमिति रत्नं आप्यायस्वेति क्षीरं दधिः क्राव्ण इति दधि देवस्यत्वेति कुशोदकं गं
धपुष्पाक्षतानि पंच पल्लवानि निक्षिप्य पूर्णपात्रं निधाय वस्त्रादिनालंकृत्य कलशपूजां कुर्यात् ततो
न्युत्तारणं अग्निः सप्तिं वाजंभरं ददातीति निगप्रतिष्ठां कुर्यात् ततः मध्यमकलशे यमाय सोमं सुनुतय

अं०निष्टि०

50

मायज्ञुकृताहविश्शायमंहयज्ञोगछत्यग्निदूतोअरंकृतः इतियमायनमः यमंआवाहयामिस्थापयामि
पूजयामि ततपूर्वकलशे इमारुद्रायस्थिरधन्वनेगिरःक्षिप्रेशवेदेवायस्वधाव्ने आशाळ्हायसहमा
नायवेधसेतिग्मायुधायभरताशृणोतुनः इतिरुद्रमावाहयामि० ततःदक्षिणकलशे अपनःशो
शुचदघमग्नेशुशुग्ध्यारयि अपनःशोशुचदघंइति अग्निआवाहयामि ततःपश्चिमकलशे इदंवि
ष्णुर्विचक्रमेत्रेधानिदधेपदं समूढमस्यपांसुरे इतिविष्णुंआवाहयामि ततःउत्तरकलशे इंद्रत्वावृ
षभंवयंसुतेसोमेहवामहे सपाहिमध्वोअंधसः इतिइंद्रआवा० ततःमध्यमकलशे यमादिआवर्णदेव
तांचस्थापयेत् यमं० धर्मराजं० मृत्युं० अंतकं० वैवस्वतं० कालं० सर्वभूतक्षयं० औडुंबरं० दध्नं० नी
लं० परमेष्ठिनं० वृकोदरं० चित्रं० चित्रगुप्तं० यमं० रुद्रं० अग्निं० विष्णुं० इंद्रं० प्रेतवाहं० प्रेतसखं०
प्रेततपं० प्रेतमहिषं० प्रेतहर्तं० इतिमध्यकलशेस्थाप्य तदस्तुमित्रावरुणा० गृहावैप्रतिष्ठासूक्तं०
प्रतिष्ठांतेगंधपुष्पादिभिःषोडशोपचारैःसंपूज्य ततःजपः ॐयत्तेयमंवैवस्वतंमनोजगामदूरकं०त

त्न आ वर्त्तयामसीह क्षयाय जीवसे यत्ते दिवं यत्पृथिवीं मनो जगा॰ तन्न आ॰ यत्ते भूमिं चतुर्भृष्टिं मनो॰ त
न्न आ॰ यत्ते चतस्रः प्रदिशो मनो॰ तन्न॰ यत्ते समुद्रमर्णवं मनो॰ तन्न॰ यत्ते मरीचीः प्रवतो मनो॰ तन्न॰
यत्ते आपो यदोषधीर्मनो ज॰ तन्न॰ यत्ते सूर्यं यदुषसं मनो॰ तन्न आ॰ यत्ते पर्वतान्बृहतो मनो॰ तन्न॰
यत्ते विश्वमिदं जगन्मनो॰ तन्न॰ यत्ते पराः परावतो मनो॰ तन्न॰ यत्ते भूतं च भव्यं च मनो॰ तन्न॰॥२॥
परेयिवांसं प्रवतो महीरनु बहुभ्यः पंथामनुपस्पशानं वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य
यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्त्तवा उ यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या३ अ
नु स्वाः मातली कव्यैर्यमो अंगिरोभिर्बृहस्पतिरृक्वभिर्वावृधानः यांश्च देवा वावृधुर्ये च देवान्स्वाहा
न्ये स्वधयान्ये मदंति इमं यम प्रस्तरमाहि सीदांगिरोभिः पितृभिः संविदानः आत्वा मंत्राः कविशस्ता व
हंत्वेना राजन्हविषा मादयस्व अंगिरोभिरागहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व विवस्वंतं हुवे यः पि
ता तेस्मिन्यज्ञे बर्हिष्यानिषद्य अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः तेषां वयं सुमतौ

अं॰ति॰ष्टि॰ यज्ञियानामपिभद्रेसुमनसेस्याम प्रेहिप्रेहिपथिभिः पूर्व्येभिर्यत्रानः पूर्वेपितरःपरेयुः उभाराजानास्वध
यामदतायमंपश्यासिवरुणंचदेवं संगछस्वपितृभिःसंयमेनेष्टापूर्त्तेनपरमेव्योमन् हित्वायावद्यंपुनर
51 स्तमेहिसंगछस्वतन्वासुवर्चाः अपेतवीतविचसर्पतातोस्माएतंपितरोलोकमक्रन् अहोभिरद्भिरक्तुभि
र्व्यक्तं यमोददात्ववसानमस्मै अतिद्रवसारमेयौश्वानौचतुरक्षौसबलौसाधुनापथा अथापितॄन्त्सु
विदत्राउपेहियमेनयेसधमादंमदंति योतेश्वानौयमरक्षितारौचतुरक्षौपथिरक्षीनृचक्षसौ ताभ्यामे
नंपरिदेहिराजन्स्वस्तिचास्माअनमीवंचधेहि उरूणसावसुतृपाउदुंबलौयमस्यदूतौचरतोजनांअनु॥
तावस्मभ्यंदृशयेसूर्यायपुनर्दातावसुमद्येहभद्रं यमायसोमंसुनुतयमायजुहुताहविः यमंहयज्ञोगछ
त्यग्निदूतोअरंकृतः यमायघृतवद्धविर्जुहोतप्रचतिष्ठत सनोदेवेष्वायमद्दीर्घमायुःप्रजीवसे यमा
यमधुमत्तमंराज्ञेहव्यंजुहोतन इदंनमऋषिभ्यः पूर्वजेभ्यःपथिकृद्भ्यः त्रिकद्रुकेभिःपततिषलुर्वीकमि
त्री बृहत् त्रिष्टुप्गाँछंदांसिसर्वातायमआहिता ३ इमारुद्रायस्थिरधन्वनेगिरःक्षिप्रेषवेदेवायस्वधान्वे

यषाल्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः महि क्षयेन क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य
चेतति अवन्नवन्तीरुपनो दुरश्चना नमीवो रुद्र जासुनो भव या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि
सा वृणक्तु नः सहस्रं ते स्वपिवात भेषजा मा नस्तोके षु तनयेषु रीरिषः मानो वधी रुद्र मा परा दा मा ते भूम
प्रसितौ हीलितस्य आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः ४ अप नः शोशुचदघमग्ने
शुशुग्ध्या रयिं अप नः शोशुचदघं सुक्षेत्रिया सुगातुया वसूया च यजामहे अप नः शो॰ प्रयद्भंदिष्ठ
एषां प्रास्माकासश्च सूरयः अप नः शो॰ प्रयत्ते अऽग्ने सूरयो जायेमहि प्र ते वयं अप नः शो॰ प्रयदग्ने
सहस्वतो विश्वतो यन्ति भानवः अप नः शो॰ त्वं हि विश्वतो मुख विश्वतः परिभूरसि अप नः शो॰ द्विषो नो
विश्वतो मुखाति नावेव पारय अप नः शो॰ स नः सिंधुमिव नावयाति मर्षा स्वस्तये अप नः॰ ॥ २॥
विष्णोर्नुकं वीर्याणि प्र वोचमीति विष्णुसूक्तं आशुः शिशानो वृषभो न भीम इमीति इन्द्रसूक्तं जपेत्॥ ततो
न्वाधानं॥ मया क्रियमाणे पंच कर्मांतिक होमे देवतापरिग्रहार्थमन्वाधानं च करिष्ये अस्मिन्नन्वाहिते

५२

52

अंतिष्टि० ग्नाविस्यादिचक्षुषी आज्येनेत्यंतमुक्त्वा अत्रप्रधानं यमं० रुद्रं० अग्निं० विष्णुं० रुद्रं० ततः यमं० धर्मराजं०
मृत्युं० अंतकं० वैवस्वतं० कालं० सर्वभूतक्षयं० औदुंबरं० दध्नं० नीलं० परमेष्ठिनं० वृकोदरं० चित्रं० चि
त्रगुप्तं० एताः प्रधानदेवताः समिच्चरुतिलयवाज्यद्रव्येण पुनरत्रप्रधानं अघोरेभ्य इति मंत्रेण अष्टो
त्तरशततिलयवाज्यद्रव्येण श्रीसूक्तं प्रत्येकं प्रतिऋचं आज्यद्रव्येण शेषेण स्विष्टकृतमित्यादिनवाहुत्या
ज्यभागांतं जुहुयात् ततः पात्रासाधनादि उत्पवनांतं निर्वपनं कुर्यात् यमाय त्वा जुष्टं निर्वपामि रुद्राय
त्वा जुष्टं नि० अग्नये त्वा जु० विष्णवे त्वा जु० इंद्राय त्वा जुष्टं० अत्रैव यमधर्मादिदेवतान् प्रेतवाहादीं च दे
तु वतान् चतुरो मूरो मुष्टिं निर्वापयेत् तथैव प्रकारेण प्रोक्षयेत् हविः श्रपयित्वा आज्यसंस्कारान् कृत्वा ।
तत्र होमः यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत स नो देवेष्वा यमद्दीर्घमायुः प्रजीवसे स्वाहा यमायेदं० १
इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधान्वे अषाल्हाय सहमानाय वेधसे तिग्मायुधाय भरता
शृणोतु नः स्वाहा रुद्रायेदं० २ इरावती धेनुमती हि भूतं सूयवसी नो मनुषे दशस्या व्यस्तभ्ना रोदसी

विष्णवेनेदाधर्थपृथिवीमभितोमयूखैस्वा० अग्नयइदं० ३ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं स
मूल्हमस्यपांसुरेस्वा० इविष्णवेइदं० ४ इंद्रत्वावृषभंवयंसुतेसोमेहवामहे सपाहिमध्वोअंधसस्वा०
इंद्रायइदं० ५ यमायस्वाहा० धर्मराजायस्वाहा० मृत्यवे० अंतकाय० वैवस्वताय० कालाय०
सर्वभूतक्षय० ओदुंबराय० दध्नाय० नीलायस्वा० परमेष्ठिनेस्वा० वृकोदराय० चित्राय०
चित्रगुप्तायस्वाहा॥ इतिसमिच्चरुतिलाज्यहोमः॥ अथतिलयवाज्यहोमः॥ अघोरेभ्योथघो
रेभ्योघोरघोरतरेभ्यः सर्वेभ्यःसर्वशर्वेभ्यो नमस्तेअस्तुरुद्ररूपेभ्यःस्वाहा॥ १००० अथवा १०८
आज्यंश्रीसूक्तेनपंचदशर्च्चेः श्रीस्वाहोमयेत्॥ हिरण्यवर्णांहरिणीं इतिसूक्तं० ततः स्विष्टकृ
तंहुत्वा पूर्णाहुतिंहुनेत् नवाज्याहुतिंचपूर्णपात्रविमाक्रांतं० अभिशेषंकृत्वा॥ ततःआ
ज्यावेक्षणं॥ रूपंरूपंप्रतिरूपोबभूवतेदस्यरूपंप्रतिचक्षणाय॥ इंद्रोमायाभिःपुरुरूपईयते

अंतिष्टि० युक्ताह्यस्यहरयः शताशतः इतिवेक्षणं तत्रदानमंत्रः अलक्ष्मीर्येच्चदौर्भाग्यं मेसर्वगात्रेष्ववस्थितं तत्स
र्वंशमयत्याज्यंलक्ष्मीपुष्टिंचवर्धय। देवस्यत्वेतिमंत्रेण ब्राह्मणाय दक्षिणायुक्तं दद्यात् ततः कर्मणः
सांगतासिध्यर्थं आचार्याय सवत्सगोदानं दत्वा यथाशक्ति गोनिष्क्रयं द्रव्यं देयं० ततः कर्मणः पुण्याहं
53 भवंतोब्रुवंतु कर्मणः स्वस्तिभवंतोब्रुवंतु कर्मणः ऋद्धिंभ० कर्मणः श्रीरस्त्विति भ० कर्मणः कल्या
णंभ० सर्वेविप्रेभ्यो अस्तु कल्याणमिति ब्रूयुः सर्वेभ्यो ब्राह्मणेभ्यः भूयसींदत्वा गृहंगत्वा स्थावरलिं
गंच पूजयेत् इतिपंचकशांतिसमाप्तं अथत्रिपादशांतिः विषमचरणाधिदर्भ्यं भद्रातिथिर्यदि
जायते सुरगुरुशनिक्ष्मापुत्राणां कथंचवासरे मुनिभिरुदितः सोयंयोगस्त्रिपुष्करसंज्ञकं स्त्रिगुणं
फलदोरद्दोहतेनष्टमृतेधवा शनिभौमेज्यवारेषु तिथिर्भद्रात्रिपादभं तदाद्विगुणयोगस्याद्विसंगु
णफलप्रदाः धनिष्ठापंचकेयाश्च देवतायात्रिपुष्करे नाम्नापूज्याःप्रयत्नेन मंत्रैस्तत्लिंगसंज्ञके
तिथिवारंचनक्षत्रं त्रिपुष्करइतीरितिः होमांतेयजमानस्य दद्याद्देवाभिषेचनं लक्ष्मीसूक्तंजपेत्त

दद्याद्दानानिभूरिशः यमोरुद्रश्चमघवानूत्रयोदेवाव्यवस्थिताः पंचकेपुष्करेहेचपूजाहोमेविधीयते इति
टीकायां विशेषस्तु पुत्तले ३ पिष्टमयकलश ३ वस्त्र ३ प्रेतहर्त्ता १ शावाधिपतिः २ मृत्यवे ३ अथवाप्रेत
हर्त्ता १ मृत्यु २ शेषंपंचकवत् न्यासः शिरे १ हृदये २ पादयोर्मध्ये ३ अथवाशिरो १ हृदये ३ अथप्रयो
गः आचम्यप्राणायामंकृत्वापंचगव्यंकार्यततः देशकालौसंकीर्त्य अमुकगोत्रस्यामुकशर्मणःप्रेत
स्यत्रिपादनिमित्तमरणजनितसूचितसकलसुद्धिजननार्थंलोकगर्हापरिहारार्थंसर्वेषांगोत्रजानांशु
भफलप्राप्त्यर्थंत्रिपादशांतिंकरिष्ये इतिसंकल्प्य तदंगस्थंडिलादिअग्निप्रतिष्ठांतं० ततोदेवतास्था
पनं० महीद्यौरितिकलशस्थापनं मध्यमकलशेयमं० दक्षिणेरुद्रं० उत्तरेअग्निं० मध्यमकलशे
आवर्णदेवतांचस्थापयेत् यमं० धर्मराजं० मृत्युं० अंतकं० वैवस्वतं० कालं० सर्वभूतक्षयं० औ
डुंबरं० दध्नं० नीलं० परमेष्टिनं० वृकोदरं० चित्रं० चित्रगुप्तं० प्रेतइतिसर्वदेवतान्पूजयेत् ततः
अन्वाधानादिपंचकशांतिवत् यमायसोममितिमंत्रेणयमंहुत्वा० इमारुद्रायेतिमंत्रेणरुद्रंहुत्वा०

54

अंतिष्टि॰ इरावती धेनुमतीति मंत्रेण अग्निं हुत्वा॰ चरु तामेकैकया हुत्वा सर्व आवर्णदेवताताः अघोरेभ्याइ
ति मंत्रेण अष्टाशताहुति तिलान् होमयेत् १०८ आज्यं श्रोऽस्त्रेण पंचदशर्चेन होमयेत् ततः स्वि
ष्टकृतं हुत्वा पूर्णाहुतिं कुर्यात् नवाज्याहुतिं च पूर्णपात्र विमोकांतं अभिषेकं कुर्यात् ततः आज्येक्ष वे
णं रूपं रूपं मिति मंत्रेण वेक्ष्य देवस्यत्वेति मंत्रेण ब्राह्मणाय दक्षिणायुक्तं दद्यात् ॐ ततः आचार्या
य गोदानं दत्त्वा विसर्जनं कुर्यात् ततः कर्मणः पुण्याहं भवंतो ब्रुवंतु स्वस्ति भवंतो॰ ऋद्धिं भवंतो॰
श्रीरस्त्विति भवं॰ कल्याणं भवं॰ ब्राह्मणेभ्यः भूयसीं दद्यात् गृहं गच्छेत् स्थावरालिंगं च पूजयेत्
इति त्रिपुष्करशांतिः॥ ॥छ॥ ॥ततः सर्पहतेन नागव्रतं कार्यं तत्संवत्सरे श्रावणशुक्लपंचमीमा
रभ्यान्यासां वा शुक्लपंचमी मारभ्य पंचम्यां सुपवासः कार्यः यद्वा चतुर्थी मेकभुक्तं पंचम्यां नक्तं
दारुमयं मृन्मयं वा नागमूर्तिं कृत्वा गंधैः करवीरैः शतपत्रैः जातीपुष्पैः धूपैः दीपैः अनंतं वासुकिं
शंखपद्मं कंबलं कर्कोटकं अश्वतरं धृतराष्ट्रं शंखपालं कालियं तक्षकं कपिलं च प्रतिमासं नामभिः

शुक्लपंचम्यां संपूज्य ब्राह्मणान् घृतपायसमोदकैः भोजयेत् संवत्सरांते चैवं संपूज्य महद्ब्राह्मणभोजनं शक्त्या
सुवर्णनागदानं गोदानं च कुर्यात् अथ चोभयोः पक्षयोः पंचम्यां भूमौ नागं पिष्टेन विलिख्य शितपुष्पैः
सितगंधेन तिलतंडुलैरभ्यर्च्य गव्यं क्षीरं मोदकं च भूमौ निवेद्य उपस्थायैवं वदन्मुंचामुकमिति तद्दिनेन
धरमश्नीयात् एवमब्दं विधिना नागमभ्यर्च्य पूर्णेऽब्दे यथाशक्ति सौवर्णं नागं च दद्यात् ततो नाराय
णबलिं च कृत्वा श्राद्धादि सर्वं कुर्यात्॥ अत्र मूलवचनादीनि स्मृतिरत्नावल्यां ज्ञेयानि अथ पूर्वोक्तपा
खड्यादीनां बुद्धिपूर्वं आत्मघातकानां च नारायणबलिप्रयोगः॥ कस्यांचिच्छुक्लैकादश्यां नदीमन्यद्वा तीर्थं
गत्वा स्नानादि कृत्वा आचम्य प्राणानायम्य देशकालौ स्मृत्वामुकगोत्रस्यामुकशर्मण आत्महत्यापाखं
डित्वादिजनितपापौघशमनद्वारा और्ध्वदेहिकसंप्रदानत्वयोग्यतासिद्ध्यर्थं नारायणबलिं च करिष्ये॥
इति संकल्प्य कलशपंचकं ब्रीहीणां यवानां चोपरि स्थापयित्वोदकेनापूर्य आपो हि ष्ठेति मंत्रत्रयेणाभि
मंत्र्य सर्वौषधितिलगंधादि प्रत्येकं प्रक्षिप्य वस्त्रेण वेष्टइत्वा पुष्पाणि पंचरत्नानि च प्रक्षिप्य तदुपरि तां

अं०ति० त्रपात्रे ब्रह्माविष्णुशिवमयप्रेतानां पंचमूर्तिस्थापयेत् आवाहनाद्युपचारः कार्यः तत्र विष्णोः पुरुषसूक्तेन
पूजा कर्त्तव्यः ब्रह्मणो हिरण्यगर्भ इति रुद्रस्य कद्रुद्रायेति यमस्य यमाय सोममिति प्रेतस्य नाममंत्रेति पं
55 चदेवताः षोडशोपचारैः पूजयित्वा स्वगृह्योक्तमार्गेण स्थंडिलेअग्निं प्रतिष्ठाप्य चरुहोमं कुर्यात्॥
अन्वाधाने आज्यभागांतमुक्त्वान्वाधानसमिधो हुत्वा स्वगृह्योक्तमार्गेण निर्वापादिविधिना चरुं श्रप
यित्वा आज्यभागांतं पुरुषसूक्तेन षोडशाहुतीर्जुहुयात् नारायणायेदं न ममेति त्यागः अन्यत्सर्वं प्राकृ
तं समाप्यार्चितदेवसमीपे अमुकगोत्रायामुकशर्मणे प्रेताय विष्णुरूपिणे अयं पिंड इति मधुघृताक्तां
स्तिलमिश्रान्दशपिंडान्विष्णुरूपेण प्रेतमनुस्मरन् प्रेतस्य नामगोत्रे उच्चार्य दक्षिणाग्रेषु दर्भेषु दक्षिणा
भिमुखोपसव्येन दत्वा येनयमं वैवस्वतमिति सूक्तेन पिंडाननुमंत्र्य कुशोस्मृतोदकेन पुरुषसूक्तेन पिं
नभिषिंच्य गंधाद्यैरभ्यर्च्य पिंडकरणांतं सत्वा नद्यां क्षिपेत् नपत्न्यै दद्यात् ततः पुरुषसूक्तेन प्रेतस्य
नामगोत्रे उच्चार्यामुकशर्मणे नारायणरूपं तर्पयामि इति षोडशवारं तर्पयेत् प्रतिऋचं ततः पुरुषा

हारपरिमितमन्नंब्रह्मणेशिवाय सकिंकराय यमाय च बलिंगृहीत्वा ब्रह्माविष्णुरुद्रादीन् यमश्चैव सकिंक
रः बलिंगृहीत्वा कुर्वंतु प्रेतस्य चक्षुर्भोगतिं इति प्रार्थ्य विष्ण्वादिभ्य इमं बलिं समर्पयामि बलिं दद्यात्॥
स्मृत्यर्थसारे होमनर्पण बलयो नोक्तः ततः प्रतिदैवतं त्रिविधं फलं समर्प्य शर्करामधुगुडसर्वं भ्यो निवे
दयेत् गीतादीना जागरणं कुर्यात् ततोऽस्यामेव रात्र्यामयुग्मान्यं च सप्त नव वा ब्राह्मणानामंत्र्य मुपो
षितः श्वोभूते मध्याह्ने विष्ण्वादीनभ्यर्च्य देशकालादिस्मृत्वा नारायणबलौ विहितं श्राद्धं पंचकमेको
द्दिष्टविधिना करिष्ये इति संकल्प्य एकोद्दिष्टविधिना ब्राह्मणं पादप्रक्षालनादि कृत्वा यथोऽस्ये छंउ दक्षु
रवानु घ वेश्य आवाहनत्तसि प्रश्नांत कृत्वा पिंडपित्रयज्ञवदुल्लेखनाद्यवनेजनांतं कृत्वा विष्णवे ब्रह्मणे
शिवाय यमाय सपरिकराय चतुरः पिंडान् दत्वा नामगोत्रविशिष्टं विष्णुरूपं प्रेतं स्मृत्वा पंचपिंडान् दद्यात्
ततो विप्रानाचांतान् दक्षिणाभिस्तोषयित्वा तन्मध्ये नाचैकं गुणवंतं ब्रह्मणं प्रेतस्थाने तिलदर्भतुलसी
युतं शंखोदकधारां दद्यात् ततः स्तैः पवित्रपाणिब्राह्मणैः कृत्वामुकगोत्रायामुकशर्मणेप्रेताय विष्णु

अंतिष्टि० 56

पायेदंतिलोदकामुपतिष्ठतामितिवाचयित्वासकुशतिलमुदकांजलीं दापयेत् ततः स्नात्वागुडशर्करापा
यसादिभिः स्वजनैः सह भुंजीतेति॥ ॥इति श्रीरामेश्वरभट्टसूरिसूनुनारायणभट्टकृतायामौर्ध्वदेहि
कपद्धतौ नारायणबलिप्रयोगः समाप्तः॥ ॥छ॥ ॥अथ नागबलिप्रयोग उच्यते॥ ॥शौनकः
अथ वक्ष्यामि सर्पस्य संस्कारविधिमुत्तमं सिनीवाल्यां पौर्णमास्यां पंचम्यां वापि कारयेत् हतसर्पव
धो विप्रः पूर्वजन्मनि वा यदि वधप्रख्यापयेत्यापि चरेत्कृच्छ्रांश्चतुर्दश विप्राय लोहदंडं च तन्मूल्यं वा
पि दापयेत् याज्ञवल्क्योप्याह उरगघ्नायसोदंडइति मूल्यमाह निष्कत्रयं द्विनिष्कं वा निष्कमेक
कनीयकं अनुस्मृत्यादिकृत्तेषां निष्कमर्धं तदर्धकं इदं सौवर्णरौप्ययोः शक्त्या ज्ञेयं तथा प्रियंगुव्री
हि गोधूमतिलपिष्टेन वा पुनः कृत्वा सर्पाकृतिं शूर्पे निधाय प्रार्थयेदिदं एहि पूर्वमृते सर्प अस्मिन्
पिष्टे समाविश संस्कारार्थमहं भक्त्या प्रार्थयामि समाहितः वस्त्रोपवीतं गंधाद्यैः संपूज्य च हरेद्बहिः
कुर्यात्संस्कारसंकल्पं प्राणायामपुरःसरं यज्ञोपवीतिनः कार्यं सर्पसंस्कारकर्मसु लौकिकाग्निं प्र

तिष्ठाप्य समिधाधानमाचरेत् ततोग्निरग्निदिग्भागे भूमिं संप्रोक्ष्य वारिभिः चितं कृत्वाथ संस्कार्येरा
ग्नेयकाष्ठकैः पर्युक्ष्याग्निं परिस्तीर्य परिषिच्य समर्चयेत् कृतेध्माधनमाघारा चक्षुषी च यथाविधिः
सर्पं गृहीत्वा यत्नेन चितिमारोपयेत्सुधीः स्रुवेण जुहुयादाज्यमग्नौ व्याहृतिभिस्त्रिभिः सर्पस्य जुहु
याद्राज्यं व्याहृत्या च समग्रया आज्यशेषं स्रुवेणैव सर्पदेहे निषेचयेत् चमसस्थैर्जलैः सर्प व्याहृत्या
स्पृश्य पाणिना अग्नेअग्नेरक्षाणि इत्येन सर्पायाग्निं प्रदापयेत् उपतिष्ठेद्दह्यमानं नमोस्तु सर्पेति
मंत्रतः ज्ञानतोऽज्ञानतो वापि कृतः सर्पो वधो मया पूर्वजन्मनि वा सर्प तत्सर्वं क्षंतुमर्हसि क्षीराज्येन
ततश्चाग्निं प्रोक्ष्य व्याहृतिभिर्जलैः नास्ति संचयनं कुर्यात् स्नात्वा चाभ्युपगृहं व्रजेत् ब्रह्मचर्यादिकं कु
र्यात्त्रिरात्राशौचमिष्यते सचैलं तु चतुर्थेह्नि स्नात्वा विप्रान्समर्पयेत् सर्पोनंतस्तथाशेषः कपि
लो नागएव च कालिकः शंखपालश्च भूधरश्चेति नामभिः गंधपुष्पाक्षतैर्धूपैर्दीपाद्यैरर्चयेद्द्विजा
न् घृतपायसभक्ष्यैश्च द्विजानन्यांश्च भोजयेत् एवं कृत्वा विधानेन सर्पसंस्कारकर्मणि सर्पहिंसा

अंतिष्टि०

57

कृतात्पापान्मुच्यते नात्र संशयः॥ ॥इति नागबलिः॥ ॥अथ सहगमनविधिः अथान्वारोहणं स्त्री
णां आत्मनो भर्त्तुरेव च सर्वपापक्षयकरं निरयोत्तारणाय च अनेकस्वर्गफलदं मुक्तिदं च तथैव च॥
जन्मांतरे च सौभाग्यं धनपुत्राभिवृद्धिदं तत्तद्देशकालौ संकीर्त्य एवंगुणेत्यादि आत्मनो भर्त्तुश्चैत
ज्जन्मजन्मांतरे च पापार्जितसर्वपापक्षयद्वारा श्रीलक्ष्मीनारायणप्रीतये पुराणोक्तानेकफलप्रा
प्तये च अन्वारोहणं च करिष्ये तदंगतया विहितहरिद्राकुंकुमांजनसौभाग्यद्रव्ययुतवंशपात्र
दानं करिष्ये इति संकल्प्य सोपस्करं शूर्पाणि दद्यात् तत्र मंत्रः लक्ष्मीनारायणो देवो बलसत्व
गुणाश्रयः गाढं दृढं सत्वं च मे देयाद्वायनैः परितोषितः सोपस्कराणि शूर्पाणि वायनैः संयुतानि
च लक्ष्मीनारायणप्रीत्यै सत्वकामा ददाम्यहं अनेन सोपस्करणं शूर्पदानेन लक्ष्मीनारायणप्री
तये ततो अग्नेः समीपे आगत्य पंचरत्नानि पल्लवेनालंजनं तथा बध्वा मुखे मुक्ताफलं न्यसेत् तथा
ग्नि प्रार्थनां कृत्वा मंत्रेनानेन निश्चितं स्वाहासंश्लेषनिर्विण्णा सर्वगात्रे हुताशन सत्वं मार्गप्रदानेन

नियमंमापत्युरंतिकं इत्यग्निंप्रार्थ्य आज्येनाग्नौजुहुयात् अग्नयेतेजोधिपतयेस्वाहा १विष्णवेसत्त्वाधि
पतयेस्वाहा २कालादिधर्माधिपतयेस्वाहा ३ पृथिव्यैलोकाधिष्ठात्र्यैस्वाहा ४अद्भ्योरसाधिष्ठात्रीभ्य
स्वाहा ५ वायवेबलाधिपतयेस्वाहा ६आकाशायसर्वाधिपतयेस्वाहा ७ कालायधर्माधिष्ठात्रेस्वा
हा ८ अद्भ्यःसर्वसाक्षिणीभ्यःस्वाहा ९ ब्रह्मणेवेदाधिपतयेस्वाहा १० रुद्रायश्मशानाधिपतये
स्वाहा ११ एकादशाहुतीर्हुत्वाकुर्यादग्नेःप्रद[illegible]क्षिणं ततः शीलांसोपस्करांसंपूज्यतामारुह्यफल
पुष्पांजलिंगृहीत्वाग्निंप्रार्थयेत् त्वमग्नेसर्वभूतानामंतश्चरसिसाक्षिवत् त्वमेवदेवजानीषेनविदुर्या
निमानुषाः अनुगच्छामिभर्त्तारंवैधव्यभयपीडिताः सत्यमार्गप्रदानेननियमांभर्तुरंतिकं मंत्रमुच्चार्य
मनेकैः प्रविशेच्चहुताशनं तांप्रेतस्यानरःसुभ्रा देवरःशिष्योवानमस्कृत्यकरेधृत्वा उदीर्ष्वेतिद्वाभ्यां
मंत्राभ्यांसत्वरहितामुत्थापयेत् सत्त्वाधिकानुसुहृदः समाश्वास्यभर्त्तारंविष्णुरूपंस्मरंतिप्रविशे
त् हरितः मृतेभर्तरियानारिधर्मशीलाहृढव्रताअनुगच्छतिभर्त्तारंभृगुणतस्यास्तियत्फलं ति

अंतिष्टि०

58

स्रकोट्यार्धकोटीच पावत्यंगरुहाणिवै तावत्यब्दसहस्राणि स्वर्गलोके महीयते मातृकं पैतृकं चैव य
त्र कन्याप्रदीयते कुलत्रयं पुनात्येषां भर्त्तारं यानुगच्छति इत्यादिवाक्यपर्यालोचनयासंकल्पेतत्तत्फल
मुल्लेख्यं अन्वारोहणे अवयववपिंडार्थः पाकः स्वतंत्रेण पिंडः पृथक् इति वृद्धपद्धतौ अन्यत्र तु अन्वारोहे तु
नाशौचं पत्यश्चैकोदकक्रिया पिंडदानक्रियानद्वैधाश्राद्धं प्रत्याब्दिकं तथा अन्वारोहे मृते पत्याः पृथ
क् पिंडाग्नितिलांजलिन् पृथक्शाले न कुर्वीत दद्यादेकशिलेतथा नवश्राद्धानि सर्वाणि सपिंडीकरणं
पृथक् एकएववृषोत्सर्गो गौरेका तत्र दीयते अन्वारोहणे एकचित्यारोहणे वा स्त्रियाः पृथक् सपिंडनं
नास्ति भर्त्तुः कृते स्त्रियाः कृतं भवतीति स्मृत्यर्थसारे तत्रैवैके नेति बहवः भर्त्रादित्रयेणान्ये अन्वारोह
णं च गर्भिणीनां बालापत्यानां रजस्वलानां सूतिकानां च निषिद्धं गर्भिणीनां च तत्र ज्ञातिवधसमं
ब्राह्मण्या एकचित्यारोहणमेव न पृथक् चित्यारोहणं क्षत्रियादिस्त्रियाः पृथक् सह वा चितिः असव
र्णायाः पृथक् चितिरेव मदनरत्नपारिजातमते अन्वारोहणे नवश्राद्धमात्रं पृथक् तत्रापि पितृमाता

महपार्वेणवत्सहैवअनुष्ठानं आपस्तंबः चितिभ्रष्टातुयाशीमोहाद्विचलितामवेत् प्राजापत्येनशुध्येतत
स्माद्वैपापकर्मणः भर्त्रनुगमनोचितिभ्रष्टेत्यर्थः यत्न्यांरजस्वलायांयदाभर्त्तामृतः साचदेशकालवशा
तद्देवानुगंतुमिच्छति नपंचमादिदिनंप्रतीक्षते तत्रविधिरुच्यते यदास्त्रियामुदक्यायांपतिःप्राण
नसमुत्सृजेत् द्रोणमेकंतंडुलानामवहन्याद्विशुद्धयेत् मुसलाघातैस्तदस्रक्स्रवतेयोनिमंडलात्
विरजस्कांमन्यमानास्वचित्तेनदस्रक्षयं दृष्ट्वाशौचंप्रकुर्वीत पंचमृत्तिकयापृथक् त्रिंशद्विंशति
दशपंचगवांदद्यात्वहः क्रमात् विप्राणांवचनाच्छुद्धासमारोहेद्धुताशनं नारीणांसरजस्कानां
इयंशुद्धिरुदाहृता अथरजस्वलामरणविधिः॥ ॥७॥ ॥अंतरिक्षेमृतायेचवन्हावसुप्रसादतः
उदक्यासूतिकानारीचरेच्चांद्रायणत्रयं संग्रहे पंचाभिस्नापयित्वातुगव्यैःप्रेतांरजस्वलां वस्त्रां
तरवृतांकृत्वादाहयेद्विधिपूर्वकं वृद्धशातातपस्तु रजस्वलायाःप्रेतायाः संस्कारादिनीनाचरेत्
उर्द्धंत्रिरात्रात्स्नातायाः शवंधर्मेणदापयेत् इतिव्युहोत्तरसंस्कारमाह अत्रदेशकालानुसाराद्धव

अं.ति.ष्टि

58

स्था अथेत्यादि अमुकगोत्रायाः अमुकस्याः रजस्वलावस्थां निमित्तप्रत्यवायपरिहारार्थं और्ध्वदेहिक
योग्यत्वार्थं च चांद्रायणत्रयप्रायश्चित्तपूर्वकं शूर्पेनाष्टोत्तरशतस्नानानि संकरिष्ये इति संकल्प्य ॥
ब्राह्मणवचनेन चांद्रायणत्रयं कृत्वा यवपिष्टेन प्रेतमनुलिप्य स्वयं स्नात्वा शूर्पोदकेन शतवारं स्ना
पयेत् प्रेतं प्रक्षाल्य भस्मगोमयमृत्तिकाकुशोदकपंचगव्यशुद्धोदकैः स्नापयेत् पावमानीस्वस्त्यय
नीयदंतोयच्चइरके आपोहिष्ठेतितिसृभिः संस्नाप्य पूर्ववस्त्रं परित्यज्य विधिना दहेत् यद्वा रजस्व
लां सूतिकां च मेह्लं प्रक्षाल्य स्नापयित्वा काष्ठवद्दग्ध्वास्थीनि विधिना दहेत् अथ सूतिकामरणं ॥
सूतिकामरणे प्राप्ते सर्वौषध्यानुलेपनां अमृतकांतु संदृष्टः शूर्पाणांतु शतं क्षिपेत् पूर्ववत्संक
ल्प्य ब्राह्मणवचनाच्चांद्रायणत्रयं कृत्वा पूर्ववच्छतं स्नानानि कारयित्वा कुंभेन जलमादाय तत्र पंच
गव्यं क्षिप्त्वा आपोहिष्ठेयवामदेव्यवारुणादिपुण्याभिरभिमंत्र्य पूर्वोक्तमंत्रैः संस्नाप्य विधिना दहेत्
अथ सूतिकामरणे दिनभेदेन विशेषप्रायश्चित्तं सूतकादियदासाध्वी विस्नातामरणंगता त्रिरात्रे

णातुपर्यैतंशुद्धेरुध्रुनसर्वदाएतत्प्रथमत्र्यहविषयं सूतकातु यदानारीरजस्माचपरिप्लुता म्रियंतेचेत्तुसा
सानारीद्विवर्षेकृच्छ्रमाचरेत् एतद्द्वितीयत्र्यहविषयं सूतिकातुयदासाध्वीत्रिरात्नातामरणंगता अत्र
कृच्छ्रेनशुद्ध्यतव्यासस्यवचनेंयथा तथा सूतिकातुयदासाध्वीविस्नातामरणंगता त्रिषत्सवदिना
दर्वागेकाब्देनविशुध्यति दशाहादुत्तरेषुच सूतिकातुयदानारीविप्रांश्चैवपरित्यजेत् मासमेकवि
विधिंयावत्त्रिभिःकृच्छ्रैर्विशुध्यति तथा सूतकायांमृतायांतुकथंकुर्वंतियाज्ञिका कुंभेसलिलमादा
यपंचगव्यंक्षिपेत्ततः हिरण्भिरभिमंत्र्यापोवाचाशुद्धिंलभेतत्ततः तेनैवस्नापयित्वातुदाहंकुर्याद्यथावि
धिः अक्लिंगावोमंत्रियाभिवामदेव्याभिरेवच अन्यैश्चवारुणैर्मंत्रैसंस्नाप्यविधिनादहेत्॥ ॥अत्र
प्रयोगः॥ ॥देशकालौसंकीर्त्यअमुकगोत्रायाःअमुकस्याःसूतिकामरणावस्थानिमित्तप्रत्यवा
यपरिहारार्थंऔर्ध्वदेहिकयोग्यतासिध्यर्थंचचांद्रायणत्रयप्रायश्चित्तशर्वकंश्चप्रेणाष्टोत्तरशतस्ना
निसंकरिष्ये इतिसंकल्प्य ब्राह्मणवचनेनचांद्रायणत्रयंकृत्वा ततःकुंभेनजलमादायपंचग

अंतिष्टि० व्यंक्षिप्त्वा स्नायात्तत्रमंत्रः आपोहिष्ठेतितिसृभिः वामदेवायेतिऋचं पावमानीसूक्तंपठेत् नानानं
वाइतिपुण्यसूक्तानिपठेत् इमंमेगंगेतिमंत्रं सितासितेतिमंत्रं तत्वायामितिऋचं अन्येश्चपुण्य
सूक्तादिपठेनस्नात्वाशुद्धवस्त्रैःप्रश्चाविधिनादहेत् अथगर्भिणीविधिः यदागर्भवतीनारीसश
५९ ल्यासंस्थिताभवेत् कुक्षिंभित्वाततःशल्यंनिर्हरेद्युदिजीवति प्रमितंनिक्षिपेत्तत्तुप्रायश्चित्तंततःप
रं मात्रयस्त्रिंशताकृछ्रैःशुद्ध्यतेशेलदोषतः सगर्भदहनेतस्यावर्णजंवधपातकं प्रायश्चित्तंचरि
त्वातुशुद्ध्यतिपापकारिणः दग्ध्वातुगर्भसंयुक्तांत्रि - - - - - - त्रिभर्त्तापुत्रोवापैत्रमेधिकविधि
नातांस्मशानंनीत्वाचितेःपश्चात्तांदक्षिणाशिरसंनिधाय तस्यानाभेरधःसव्यउदरेचतुरंगुल
प्रमाणंऊर्ध्वंवाषडंगुलप्रमाणंदर्भेणतांछेदयेत् षण्मासादूर्ध्वंशिशोःप्राणाःसंभवन्ति॥अत॥
हिरण्यगर्भःसमवर्त्तताग्नेभूतस्यजातःपतिरेकआसीत् सदाधारपृथिवींद्यामुतेमांकस्मैदेवा
देवायहविषाविधेम इतिमंत्रेणयाभर्त्ताअन्यावातस्याःगर्भस्थानमसौछित्वाकुमारंकुमारींवा

तत्रमंत्रमुक्त्वा इमेजीवाविमृतैरावर्त्रन्नभूद्भुद्रादेवहूतिर्नोअद्य प्रांचोअगामनृतयेहसाय
द्राघीयआयुःप्रतरंदधानाः इतिमंत्रेणाभिमंत्र्य हृष्टोमृतश्चेत्तत्स्त्रक्षाल्यनिखनेत्॥ यद्दिजी
वतिनहिजीवत्वंममपुत्रइत्युक्त्वा॥ क्षत्रियेत्वानिर्ऋतेत्वेत्यादिपंचभिः स्नापयित्वा भूमौहिरण्य
मंतर्धायतत्रतल्पीनिधायमंत्रंपठेत् यस्तेस्तनःशशयोयोमयोभूर्येनविश्वापुष्यसिवार्याणि॥
योरत्नधावसुविद्यःसुदत्रःसरस्वतीतमिहधातवेकः इतिमंत्रेणअन्यस्यास्तनंप्रतिधायत्रिःशु
याभंपाययित्वा तस्याःगर्भच्छेदनदेशःस्रुवेणान्याहुतीर्जुहुयात् तत्रमंत्रः शतायुधायशतवी
र्यायशतोतयेभिमातिषाहे शतंयोनिःशरदोअजीतानिंद्रोनेषदतिदुरितानिविश्वास्वाहा॰
इंद्रायेदं॰ येचत्वारपथयोदेवयानाअंतराद्यावापृथिवीवियंति तेषांयोअज्यानिमजीतिमा
वहात्तस्मैनोदेवाःपरिधत्तेहसर्वेस्वाहा देवेभ्यइदं॰ ग्रीष्मोहेमंतउतनोवसंतःशरद्वर्षाःसुवि

अं० तिष्टि०

60

तन्नोअस्तु तेषामृतूनांशतशारदानांनिवातयेषामभयेस्यामस्वाहा ऋतुभ्यइदं० इदुवत्सराय
संवत्सरायकृणुताबृहन्नमः तेषांवयंसुमतौयज्ञियानांज्योगजीताअहतास्यामस्वाहा॥
इदुवत्सरायेदं० भद्रान्नःश्रेयःसमनैष्टदेवास्त्वयावसेनसमशीमहित्वा सनोमयोभूःपितोआ
विशास्वशंतोकायतनुवेस्योनःस्वा० देवेभ्यइदं० प्रयासायस्वाहा १ एतद्द्वादशमंत्रेषुमंत्रोक्तदे
वतायइदंनममेतित्यागः अयासायस्वाहा २ वियासायस्वा० ३ संयासाय० ४ उद्यासाय० ५ अ
वयासाय० ६ शुचेस्वा० ७ शोकाय० ८ तपत्यै० ९ तपते० १० ब्रह्महत्यायै० ११ सर्वस्मै० १२ प्राणा
यस्वाहा १ एतेसप्तभिर्मंत्रोक्तदेवताभ्यइदंनममेतित्यागः अपानाय० २ व्यानाय० ३ चक्षुषे० ४
श्रोत्राये० ५ मनसेस्वा० ६ वाचेसरस्वत्यैस्वा० ७ मंत्रोक्त० ततःपूष्णेस्वा० १ एतेसप्तभिःपूष्णइदं
नममेतित्यागः पूष्णेसस्वा० २ पूष्णेप्रपथ्याय० ३ पूष्णेनरंधीषाय० ४ पूष्णेघृणयेस्वा० ५
पूष्णेवरुणाय० ६ पूष्णेसाकेताय० ७ पूष्णइदं० भूर्भुवःस्वःस्वाहाप्रजापतयइदं० इत्येतेराज्या

हुतीर्हुत्वा ततो छेदनप्रदेशं शस्त्रेण सग्रंथ्य घृतेनानुलिप्तं उदरछेदप्रायश्चित्तार्थं वेदपारगाय कुंडु
विने ब्राह्मणाय गोभूतिलहिरण्यानि दद्यात् ततो भर्त्ता पुत्रो वा यथाप्रयोगं करोति इत्याह भगवान् बौ
धायनमः इति गर्भिणीमरणविधिः समाप्तः अथ घटस्फोटविधिः कालनिर्णयदीपिकायां नि
बंधसारे ब्राह्मणक्षत्रियवैश्यानां घटस्फोटे विबुधः अन्येषां चैव जातीनां नैवोक्तं तु कदाचन॥ हे
माद्रौ॥ घटस्फोटादिकं कर्म ब्राह्मणादीन्त्रिभिस्तथा अतीते कर्मयेषां तु तेषां प्रोक्ताः प्रयत्नतः।
कर्त्ता घटं समादाय जलेनापूर्य सव्यधृक् चतुष्पथे प्रतिष्ठाप्य स्वगोत्रजैः समागतः तत्र मंत्रः अ
स्मद्वंशे पतितस्तु वंशप्रशाहिकारणं प्रमादात् कृतं कर्म घटेनैव विशुद्ध्यति अगम्यागमने चैव भ्रष्टा
त्रष्टस्तथैव च गोमांसमद्यपानं च मात्रादिगमनं तथा स्नुषापुत्रीस्तु गोहत्या गोब्राह्मणमतः परं
अन्यानि च निषिद्धानि पापानि च बहूनि च देहांते विविधैस्तेषां वा घटादीनि चिंतयेत् इत्युक्त्वा स
र्वगोत्रजाः अपसव्यं कृत्वा वामहस्तेन घटस्पर्शनं कारयेत्* शूद्राअलाभे सति आचार्येण सर्वे

* पश्चात् शूद्रा वामचरणाभिघातेन दक्षिणाभिमुखो भूत्वा स्फोटयेत्॥ १

अंतिष्टि० यांब्राह्मणानामाज्ञांगृहीत्वावामांघ्रिचरणघातेनस्फोटयेत् शंखध्वनिः कर्त्तव्यः पश्चात्आचार्ये
णस्वशरीरमुंडनंकर्त्तव्यंगोत्रजैः नकदाचन इतिजगदीश्वरंप्रार्थ्यब्राह्मणानांनत्वा अकर्माण्यपत
नंनित्यंवंशच्छेदस्तथैवच निरयादीन्भोगांश्चयावच्चंद्रदिवाकरौ एवंज्ञात्वाद्विजैःसर्वैः घटस्फो
61 टःयथाविधिः घटस्फोटस्यकर्त्तव्योयथोक्तविधिनाखलु पतितायद्दशाहक्रियान्नास्ति अ
स्यान्नास्तियेनकर्त्तव्याक्रियासोऽपिपतितःस्यादितिवचनात् अतःकारणात्दशाहक्रियान
कर्त्तव्यं आहोनिबंधादीनांनिर्णयः गोदानानिकल्पयेत् पश्चात्घटस्फोटः तथाचमांडव्यः
घटस्फोटोहियत्रास्तुदशाहंतत्रनाचरेत् नोच्चारंनचअश्मानंतिलांजलिंनदापयेत् पर्यो
कानिचकर्माणिगर्भपातेनसंविदुः गर्भपातेतुदशाहविधिः गोत्रोच्चारंन तथापतितेषु।।
अथघटस्फोटनदिवसेकर्मारंभादौब्रह्मदंडकर्त्तव्यं ब्राह्मणसमुदायायब्रह्मदंडार्थंधर्मशास्त्रो
क्तंहिरण्यंगृहीत्वास्त्रीनप्रदक्षिणान्कृत्वाउपचारेप्रणम्य अथपतितस्यसंकल्पः देशकालौ

संकीर्त्य अस्य यजमानस्य पितृगोत्रशर्मणः पतितस्य गतकालसंभावितानि पापानि जन्मप्रभृति बहूनि
विविधानि च गतदिवसादारभ्य एतत्कालपर्यंतं आत्मनशुध्यर्थं सर्वेषां गोत्रजानां शुध्यर्थं च धर्मशास्त्रा
त्कृच्छ्रप्रायश्चित्तांगभूतं ब्राह्मणाग्रे ब्रह्मदंडोहं करिष्ये इति संकल्प्य केचिदाचार्याः पुत्तलिकां पालाशवि
धिः सर्वैः गोत्रजैः गोमूत्रप्राशनं कार्यं पश्चाद्भस्मगोमयमृत्तिकास्नानं हेमाद्रिप्रयोगश्चोक्तव्यं पंच
गव्यप्राश्य पश्चात् निंबपत्राणां चर्वणं कार्यं॥ ईश्वरदर्शनेन सर्वशुद्धिः॥ यत्र घटस्फोटः तत्र क्रि
यानास्तिः॥ पतितस्य क्रिया इति॥ न वाच्यं॥ शुध्यर्थं विष्णुपूजनं ब्राह्मणान्भोजयेत्॥ अथ प्रार्थना॥
अस्माकं आयुरारोग्यं वंशस्थानास्तथैव च कल्याणं च शुभं नित्यं देहि मे मधुसूदन केचित्नाराय
णबलिं च वदंति तत्बुधः तृतीयदिवसे यथाशक्त्या भूरिभोजनं कार्यं पुण्याहवाचनं मातृकापू
जनं नांदीश्राद्धं विष्णुपूजनं सूतकं च एकाहं त्र्यहं वा कर्तव्यं इति घटस्फोटविधिः समाप्तः॥ ॥इति
श्रीभट्टरामेश्वरसूरिसूनुनारायणभट्टकृतायामौर्ध्वदेहिकपद्धतौ उपयोगिनो निर्णये अंत्येष्टि

62

अंतिष्टि० पद्धतिसमाप्तः।। ।।अथत्रिपिंडीविधिः तीर्थेगत्वाविधिस्नानः कृतमान्हिकः क्रिया स्थलंशुद्धं कल्पयि
त्वा गोमयेनोपलिप्य ते विष्णुपूजनंसमभ्यर्च्यत्रिपिंडीकरणंततः आचम्यप्राणायामंकृत्वा नूतन
वस्त्रंपरिधाय स्थलंकल्पयित्वा गोमयेनोपलिप्य विष्णुपूजनं कुर्यात् तत्रसंकल्पः पवित्रंते वितंतं
ब्रह्मणस्पत इतिमंत्रेणपवित्रंधृत्वा देशकालौसंकीर्त्य त्रिविधानांसात्विकराजसतामसानांमोक्षा
र्थंमम आरोग्यार्थंसंतत्यादिप्रतिबंधनिवृत्यर्थंच एकोद्दिष्टतंत्रयात्मकं तंत्रेण श्राद्धत्रयं कर्तुकामो आ
दौ विष्णुपूजनमहंकरिष्ये इतिसंकल्प्य प्रेतान्विष्णुमयान्स्मरन् पुरुषसूक्तेन षोडशोपचारैर्वि
ष्णुः प्रपूजयेत् पुनर्देशकालौसंकीर्त्य अपसव्यंकृत्वा अज्ञाननामगोत्राणां सात्विकराजसतामसा
नांप्रेतानांमोक्षानां च मम संतत्यादिसुखार्थं ऐश्वर्यादि चिरंजीवितं इह जन्मनि प्रेतबाधानिवृत्यर्थं गृ
हे भांडभाजनशुद्ध्यर्थं कालातिक्रमदोषपरिहारार्थं श्राद्धदोषप्रायश्चित्तस्वरूपं जाप्यमहंकरिष्ये स
व्येन तिलोदकेन कृत्वा गंधपुष्पैः प्रपूज्य ततमंहो नूदुरितमिति सूक्तं पठेत् शुचीवोहव्येतिमार्जनं

कुर्यात् ततः त्रिभिः ब्राह्मणान् प्रत्येकमेकमेकं निमंत्रयेत् अपसव्यं कृत्वा अज्ञातनामगोत्राणां सात्विक
प्रेतानां स्थाने भवद्भिः क्षणः प्रसादः करणीयः ततः अज्ञातनामगोत्राणां राजसानां नरकस्थ वायुरूपि
णां प्रेतानां स्थाने भवद्भिः क्षणः प्र० ततः अज्ञातनामगोत्राणां भूमिस्थिततामसरूपिणां प्रेतानां स्था
ने भवद्भिः क्षणः क्षे प्र० इति क्षणं दत्वा यदि ब्राह्मणं नास्ति तर्हि ब्राह्मणाभावे प्रतिमात्रितयं स्थापनं
कुर्यात् सव्येन प्रतिमादिस्थापनं कलशाराधनं चेति सव्यं अद्येत्यादि संकल्प्य सात्विकराजसता
मसप्रेतानां प्रतिमास्थापनं करिष्ये महीद्यौरित्यादि कलशस्थाप्य वरुणपूजां ते सुवर्ण १ रौप्य २
लोह ३ प्रतिमा अग्न्युत्तारणं कृत्वा प्राणप्रतिष्ठां कुर्यात् दक्षिणक्रमेण स्थापयेत् तद्यथा सात्विक
रूपं प्रेतं अनिर्दिष्टनामगोत्रं सापेक्षकं उत्तरकलशं ध्याययामि ततः राजसरूपिणं प्रेतं अनिर्दिष्टना
मगोत्रं सापेक्षकं मध्यकलशं ध्याययामि ततः तामसरूपिणं प्रेतं अनिर्दिष्टनामगोत्रं सापेक्षकं द
क्षिणकलशे ध्याययामि सुवर्णप्रतिमा सात्विकस्थाने रौप्यप्रतिमा राजसस्थाने लोहप्रतिमा ता

६३

63

अं ति क्रि॰ मसस्थाने स्थापयेत् आवाहनं॰ आसनं॰ पाद्यं॰ अर्घ्यं॰ प्रत्येकं अपसव्यं दद्यात् आच्छादनांतं पंचोप
चारैः पूजयेत् यदि साक्षाद्ब्राह्मणं अस्ति तदा ब्राह्मणेभ्यः पादप्रक्षालनादि अर्घ्यांताः आच्छादनांतं
पदार्थानुसमयेन कृत्वा भोजनादौ पिंडदानं कुर्यात् तस्य प्रयोगः अपसव्यं अद्येत्यादि अनिर्दिष्टना
मगोत्राणां सात्विकराजसतामसप्रेतानां त्रिपिंडाकश्राद्धांगभूतं पिंडप्रदानं करिष्ये अपहतेति एकां
लेखामुल्लिख्य अभ्युक्ष्य कुशानास्तीर्य इति त्वा न प्रक्षिप्य सात्विकपिंडदानं मधुरत्रययुतं दधिमधुघृ
तयुक्तं यवमयपिंडं कृत्वा पितृवंशे मृताय चेति धर्मे पिंडं प्रदास्यामीति विहितैस्त्रिभिः श्लोकैरवनेज्ञा
नं दत्वा पिंडं स्पृष्ट्वा मधुवाता इति ऋचं जप्त्वा प्रथमपिंडमादाय पितृवंशे मृताय चेति पूर्ववत्॥ श्लो
कत्रयं पठित्वा इमं यवमयपिंडं मधुसर्पिसमन्वितं ददामि तस्मै प्रेताय यः पीडां कुरुते मम एके चि
त्प्रेतरूपेण वर्त्तंते पितरो मम यवपिंडप्रदानेन तृप्तिं गच्छंतु शाश्वतीं ये केचिद्विविति ष्ठंति प्रेताः सा
त्विकरूपिणः सात्विकात्पिंडदानेन तृप्तिं गच्छंतु ते क्षयां इति पिंडं दत्वा ततः द्वितीयस्यापि लेखा

करणाद्यवनेजान्वा तं कृत्वा दधिमधुघृतयुक्तं व्रीहिपिष्टमयं पिंडं कृत्वा मधुवाता इति ऋचं जप्त्वा पिंडमा
दाय पितृवंशे मृताये चेति श्लोकत्रयं पठित्वा इमं व्रीहिमयं पिंडं मधुरत्रयसंयुतं तन्मुक्तये प्रदास्या
मि दिंडाय: कुरुते मम ये के चिद्वायुरूपेण वर्त्तंते पितरो मम तंडुलैः पिंडदानेन व्रजंतु गतिमुत्तमां
अंतरिक्षे च ये के चित् राजसा वायुरूपिणः राजसा पिंडदानेन तृप्यंतु मुदान्विताः इति षड्भिः
श्लोकैः द्वितीय पिंडं दत्वा पुनः स्तृतीये स्वेरवारणाद्यवनेजान्वा तं कृत्वा दधिमधुघृतसंयुतं तिल
पिष्टमयं पिंडं कृत्वा मधुवाता इति ऋचं जप्त्वा पितृवंशेति पूर्ववत् श्लोकत्रयं पठित्वा इमं तिलमयं
पिंडं सर्पिषा मधुनायुतं तेभ्यो ददामि ये पिंडा मत्कुले कुरुते सदा ये के चित्तामसाः प्रेता भूमौ तिष्ठ
सर्वदा तिलपिंडप्रदानेन गतिं गच्छंतु ते ध्रुवं नमो रूपाश्च ये के चिद्वर्त्तंते पितरो मम पिण्याकास्पिंड
दानेन ते तृप्यंतु क्षुधार्दिताः इति षड्भिः श्लोकैः तृतीय पिंडं दत्वा अत्र पितर इत्यादि प्राणभक्षं तं कृत्वा
पूर्ववत्पिंडत्रयमवनिमृज्य नमो वः पितर इत्युपस्थानमतिपिंडं स्त्रत्रयं स्वखरजतेमा वर्णीदत्वा॥

अंतिष्टि

64

गंधधुपत्वारैः पूजयेत् तत्रापि विशेषः सात्विकेभ्यः श्वेतपुष्पं राजसानां रक्तपुष्पं तामसानां कृष्ण
पुष्पं सात्विकेभ्यः पायसनैवेद्यं राजसेभ्यः माषान्नं तामसेभ्यः कृशरान्नं ततः तांबूलादिदक्षि
णां समर्प्य ततोऽर्घ्यं श्वेतपुष्पजलसहितैः मातुलिंगफलैः अनिर्दिष्टनामगोत्रेभ्यः सात्वि
कप्रेतेभ्योइदमर्घ्यं ददामि जंबीरफलैः राजसप्रेतेभ्योइदमर्घ्यं० उत्तरतीभिस्तामसेभ्यः इदम०
ततः परेतनेति प्रवाहणानेइदं विष्णुरिति पंचऋग्भिः चतुरावृत्त्या विष्णुतर्पयामि इति तर्पणं कु
र्यात् ब्राह्मणं स्वस्तिं वाचयित्वा श्वोनकोक्तरीत्या तत्र यथा मह्यं सहकुटुंबिने महाजनान्नेम
स्कुर्वाणाय आशीर्वचनमुपेक्षमाणाय सात्विकराजसतामसप्रेताभिष्टनिरसनाख्यस्य
कर्मणः पुण्याहं भवंतो ब्रुवंतु कर्मणः स्वस्ति भवंतो ब्रुवंतु कर्मणः ऋद्धिं भवंतो ब्रुवंतु। कर्म
णः श्रीरस्त्विति भवं० कल्याणं भ० ततः ब्राह्मणहस्ते पाणिहोमं कृत्वा ॥ सात्विकेभ्यः मधुसंयुतं
पायसान्नं परिविष्य राजसेभ्यः माषान्नं० तामसेभ्यः कृशरान्नं परिवेष्य अन्नप्रथिवीतेति त्यक्तं आपो

सनादिविकिरदानांतंकृत्वादक्षिणाभिस्तोषयित्वासात्विकेभ्यः धेनुवस्त्रं राजसेभ्यः कमंडलुं तामसे
भ्यः उपानद्द्वयंच — — तांबूलादिदद्यात् ततः ब्राह्मणान्प्रार्थ्य दिव्यंतरिक्षभूमिष्ठाः सात्विकाश्च
राजसास्तथा प्रेतावैतामसायेन्येशांतियुक्तंतुतर्पिता इतिप्रार्थ्य ततः ब्राह्मणाब्रूयुः यजमाना
यतवशांतिंभविष्यति आरोग्यंभ० ऐश्वर्यंभवति ततः वाजेवाजेतिमंत्रंपठेत् श्राद्धंविसर्जयेत्॥
ततः आचार्यंपूजयेत् विष्णुप्रतिमांसकलशत्रयंसात्विकराजसतामसप्रतिमाः दक्षिणायुक्तं
देवस्यत्वेतिमंत्रेणआचार्यहस्तेदद्यात् ततः कर्मांगत्वगोदानंदत्वा सांगतासिध्यर्थंभूयसींदत्वा
परिधानवस्त्रंचोत्तरीयवस्त्रंचआचार्यायदद्यात् ततोयजमानः सचैलस्नानंकुर्यात् गृहंगत्वा
सर्वेभुंजरन्॥ ॥छ॥ इतित्रिपिंडीविधिः समाप्तः॥ ॥अथअस्थिधारणविधिः॥ ॥ब्रह्मांडपुरा
णे॥ अजिनंकंबलोदर्भान्गोकेशान्भूर्जपत्रकंऊर्णान्सूत्रंपट्टसूत्रंअस्थिस्यात्सप्तवेष्टनं॥
भूर्जपत्रंकुशावेत्रंपट्टकूलंशणस्तथा कृष्णाजिनंकंबलंचसप्तवेष्टनमुच्यते स्मृतिः कार्योसं

अंतिष्टि०

65

क्षौमकौसेयं विकाशाणेणचर्मच औदुंबरं सप्तमस्यात् क्रमाद्द्याद्वेष्टनं तथा पट्टवस्त्रं च कौ
सेयं मांजिष्टं श्वेतवस्त्रकं केवलं शाणपट्टं च अनिनं सप्तवेष्टनं अथ कारिकायां स्नानं कृत्वा ततः
स्थाप्य केशवाद्यैश्च नामभिः प्रक्षाल्य पंचगव्येश्च पुष्पादिभिः समर्चयेत् गायत्र्याचैव संप्रोक्ष्य
केशवाद्यैस्ततः पुनः मंत्रैः षट्त्रिंशद्भिः स्नात्वा शतमष्टोत्तरं त्रातं धेनुं दत्वा च विप्राय अनुज्ञा
तां समाहितः उच्चारयेद्गोत्र नामं संकल्पं च यथाविधिः आचम्य प्राणानायम्य देशकालौ संकी
र्त्य अस्मत्पित्रादेः अमुकशर्मणो गोत्रस्य सर्वपापशमनार्थं गर्भविमोक्षार्थं गंगायां अस्थिनिक्षेप
णार्थे अस्थिसंशुद्ध्यर्थं पंचगव्यादिस्नानं करिष्ये गायत्र्या गोमुत्रं गंधद्वारेति गोमयं आप्यायस्वे
ति क्षीरं दधिक्राव्णो दधि शुक्रमसि इति घृतं देवस्य त्वेति कुशोदकं ततः स्नानं आपो हिष्ठेति ति
सृभिः ३ ततो न्विंद्रमिति त्रिभिः ३ तरत्समंदिति चतसृभिः ४ पुरुषसूक्तं पंचदश १५ यदंति यच्च
दूरकेत्यष्टभिः ८ परं मृत्यो इति ऋक् १ सुमित्रान इति १ इति षट्त्रिंशद्भिः ३६ पुनः शंखो

अं॰ति॰ष्टि॰

दकेनम्रसेवस्वरोमितिमंत्रेणतान्नपात्रेप्रस्थाप्य कुशैः केशवाद्यैः संप्रोक्ष्य तान्नपात्रे निक्षिप्य गं
धपुष्पतिलदर्भपत्रतुलसीदलैरभ्यर्च्य पंचरत्नानि निक्षिप्य यथानुक्रमं वेष्टयेत् (कुशा१पट्ट
सूत्रं२ भूर्जपत्रं३ गोकेश४ उर्णसूत्रं५ अंजिनं६ कंबलं७ इत्यनुक्रमं सप्तवेष्टनानि कुर्यात्॥
ततः आचार्याय गोदानं दद्यात् यथाशक्ति आमान्नं दद्यात् इति गंगानिक्षेपनार्थं अस्थुद्धरण
विधिसमाप्तं॥ ॥इति श्री भट्टरामेश्वरसूरिसुनुनारायणभट्टकृतायामोर्ध्वदेहिकपद्धतौ उपयो
गिना निर्णये अंत्येष्टिपद्धतिः समाप्तः॥ ॥राक्षसनामसंवत् १८७१ कार्तिकशुक्ल १३ चंद्रवा
सरे तद्दिने लिखितं मंसाराम आत्मजे बाळकृष्णभट्ट निझेरकरे राजेश्री वेदमूर्ति दीक्षित पांडुरंग
भट्ट इरलेकरस्येदं पुस्तकं॥ ॥यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया॥ यदि शुद्धमशुद्धं वा मम
दोषं न दीयते॥१॥ तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छीतलबंधनात् मूर्खहस्ते न दातव्यं इदं वदति पुस्तकं॥२॥

पद्धतिः समाप्ती
४५५.

। ऋग्वेदिनामौर्द्ध्वदेहिकपद्धतिरियम्